kakArAdi kAlI sahasranAma stotram

# કકારાદિ કાલીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : kakArAdi kAlI sahasranAma stotram

File name : kaaliisahasra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Ravin bhalekar ravibhalekar at hotmail.com, NA

Description-comments : Also known as kAlI medhAsAmrAjyaprada sahasranAmastotra

Source : kAlakAlIkhaNDe mahAkAlasa.nhitAyAM

Latest update : November 14, 2005, June 24, 2020, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# કકારાદિ કાલીસહસ્રનામસ્તોત્રમ્

કાળ્યાઃ મેધાસામ્રાજ્યપ્રદસહસ્રનામસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
કૈલાસશિખરે રમ્યે નાનાદેવગણાવૃતે ।
નાનાવૃક્ષલતાકીર્ણે નાનાપુષ્પૈરલઙ્કૃતે ॥ ૧॥

ચતુર્મણ્ડલસંયુક્તે શ‍ૃઙ્ગારમણ્ડપે સ્થિતે ।
સમાધૌ સંસ્થિતં શાન્તં ક્રીડન્તં યોગિનીપ્રિયમ્ ॥ ૨॥

તત્ર મૌનધરં દૃષ્ટ્વા દેવી પૃચ્છતિ શઙ્કરમ્ ।
દેવ્યુવાચ ।
કિં ત્વયા જપ્યતે દેવ કિં ત્વયા સ્મર્ય્યતે સદા ॥ ૩॥

સૃષ્ટિઃ કુત્ર વિલીનાસ્તિ પુનઃ કુત્ર પ્રજાયતે ।
બ્રહ્માણ્ડકારણં યત્તત્ કિમાદ્યં કારણં મહત્ ॥ ૪॥

મનોરથમયી સિદ્ધિસ્તથા વાઞ્છામયી શિવ ।
તૃતીયા કલ્પનાસિદ્ધિઃ કોટિસિદ્ધીશ્વરાત્મકમ્ ॥ ૫॥

શક્તિપાતાષ્ટદશકં ચરાચરપુરીગતિઃ ।
મહેન્દ્રજાલમિન્દ્રાદિજાલાનાં રચના તથા ॥ ૬॥

અણિમાદ્યષ્ટકં દેવ પરકાયપ્રવેશનમ્ ।
નવીનસૃષ્ટિકરણં સમુદ્રશોષણં તથા ॥ ૭॥

અમાયાં ચન્દ્રસન્દર્શો દિવા ચન્દ્રપ્રકાશનમ્ ।
ચન્દ્રાષ્ટકં ચાષ્ટદિક્ષુ તથા સૂર્યાષ્ટકં શિવ ॥ ૮॥

જલે જલમયત્વં ચ વહ્નૌ વહ્નિમયત્વકમ્ ।
બ્રહ્મ-વિષ્ણ્વાદિ-નિર્માણમિન્દ્રાણાં કારણં કરે ॥ ૯॥

પાતાલગુટિકા-યક્ષ-વેતાલપઞ્ચકં તથા ।

રસાયનં તથા ગુપ્તિસ્તથૈવ ચાખિલાઞ્જનમ્ ॥ ૧૦॥

મહામધુમતી સિદ્ધિસ્તથા પદ્માવતી શિવ ।
તથા ભોગવતી સિદ્ધિર્યાવત્યઃ સન્તિ સિદ્ધયઃ ॥ ૧૧॥

કેન મન્ત્રેણ તપસા કલૌ પાપસમાકુલે ।
આયુષ્યં પુણ્યરહિતે કથં ભવતિ તદ્વદ ॥ ૧૨॥

શ્રીશિવ ઉવાચ ।
વિના મન્ત્રં વિના સ્તોત્રં વિનૈવ તપસા પ્રિયે ।
વિના બલિં વિના ન્યાસં ભૂતશુદ્ધિં વિના પ્રિયે ॥ ૧૩॥

વિના ધ્યાનં વિના યન્ત્રં વિના પૂજાદિના પ્રિયે ।
વિના ક્લેશાદિભિર્દેવિ દેહદુઃખાદિભિર્વિના ॥ ૧૪॥

સિદ્ધિરાશુ ભવેદ્યેન તદેવં કથ્યતે મયા ।
શૂન્યે બ્રહ્મણ્ડગોલે તુ પઞ્ચાશચ્છૂન્યમધ્યકે ॥ ૧૫॥

પઞ્ચશૂન્યસ્થિતા તારા સર્વાન્તે કાલિકા સ્થિતા ।
અનન્ત-કોટિ બ્રહ્માણ્ડ રાજદણ્ડાગ્રકે શિવે ॥ ૧૬॥

સ્થાપ્ય શૂન્યાલયં કૃત્વા કૃષ્ણવર્ણં વિધાય ચ ।
મહાનિર્ગુણરૂપા ચ વાચાતીતા પરા કલા ॥ ૧૭॥

ક્રીડાયાં સંસ્થિતા દેવી શૂન્યરૂપા પ્રકલ્પયેત્ ।
સૃષ્ટેરારમ્ભકાર્યાર્થં દૃષ્ટા છાયા તયા યદા ॥ ૧૮॥

ઇચ્છાશક્તિસ્તુ સા જાતા તથા કાલો વિનિર્મિતઃ ।
પ્રતિબિમ્બં તત્ર દૃષ્ટં જાતા જ્ઞાનાભિધા તુ સા ॥ ૧૯॥

ઇદમેતલ્લિંવિશિષ્ટં જાતં વિજ્ઞાનકં મુદા ।
તદા ક્રિયાઽભિધા જાતા તદીચ્છાતો મહેશ્વરિ ॥ ૨૦॥

બ્રહ્માણ્ડગોલે દેવેશિ રાજદણ્ડસ્થિતં ચ યત્ ।
સા ક્રિયા સ્થાપયામાસ સ્વ-સ્વસ્થાનક્રમેણ ચ ॥ ૨૧॥

તત્રૈવ સ્વેચ્છયા દેવિ સામરસ્યપરાયણા ।
તદિચ્છા કથ્યતે દેવિ યથાવદવધારય ॥ ૨૨॥

યુગાદિસમયે દેવિ શિવં પરગુણોત્તમમ્ ।
તદિચ્છા નિર્ગુણં શાન્તં સચ્ચિદાનન્દવિગ્રહમ્ ॥ ૨૩॥

શાશ્વતં સુન્દરં શુદ્ધં સર્વદેવયુતં વરમ્ ।
આદિનાથં ગુણાતીતં કાલ્યા સંયુતમીશ્વરમ્ ॥ ૨૪॥

વિપરીતરતં દેવં સામરસ્યપરાયણમ્ ।
પૂજાર્થમાગતં દેવ-ગન્ધર્વાઽપ્સરસાં ગણમ્ ॥ ૨૫॥

યક્ષિણીં કિન્નરીકન્યામુર્વશ્યાદ્યાં તિલોત્તમામ્ ।
વીક્ષ્ય તન્માયયા પ્રાહ સુન્દરી પ્રાણવલ્લભા ॥ ૨૬॥

ત્રૈલોક્યસુન્દરી પ્રાણસ્વામિની પ્રાણરઞ્જિની ।
કિમાગતં ભવત્યાઽદ્ય મમ ભાગ્યાર્ણવો મહાન્ ॥ ૨૭॥

ઉક્ત્વા મૌનધરં શમ્ભું પૂજયન્ત્યપ્સરોગણાઃ ।
અપ્સરસ ઊચુઃ ।
સંસારાત્તારિતં દેવ ત્વયા વિશ્વજનપ્રિય ॥ ૨૮॥

સૃષ્ટેરારમ્ભકાર્ય્યાર્થમુદ્યુક્તોઽસિ મહાપ્રભો ।
વેશ્યાકૃત્યમિદં દેવ મઙ્ગલાર્થપ્રગાયનમ્ ॥ ૨૯॥

પ્રયાણોત્સવકાલે તુ સમારમ્ભે પ્રગાયનમ્ ।
ગુણાદ્યારમ્ભકાલે હિ વર્ત્તતે શિવશઙ્કર ॥ ૩૦॥

ઇન્દ્રાણીકોટયઃ સન્તિ તસ્યાઃ પ્રસવબિન્દુતઃ ।
બ્રહ્માણી વૈષ્ણવી ચૈવ માહેશી કોટિકોટયઃ ॥ ૩૧॥

તવ સામરસાનન્દ દર્શનાર્થં સમુદ્ભવાઃ ।
સઞ્જાતાશ્ચાગ્રતો દેવ ચાસ્માકં સૌખ્યસાગર ॥ ૩૨॥

રતિં હિત્વા કામિનીનાં નાઽન્યત્ સૌખ્યં મહેશ્વર ।
સા રતિર્દૃશ્યતેઽસ્માભિર્મહત્સૌખ્યાર્થકારિકા ॥ ૩૩॥

એવમેતત્તુ ચાસ્માભિઃ કર્તવ્યં ભર્તૃણા સહ ।
એવં શ્રુત્વા મહાદેવો ધ્યાનાવસ્થિતમાનસઃ ॥ ૩૪॥

ધ્યાનં હિત્વા માયયા તુ પ્રોવાચ કાલિકાં પ્રતિ ।
કાલિ કાલિ રુણ્ડમાલે પ્રિયે ભૈરવવાદિની ॥ ૩૫॥

શિવારૂપધરે ક્રૂરે ઘોરદ્રંષ્ટે ભયાનકે ।
ત્રૈલોક્યસુન્દરકરી સુન્દર્ય્યઃ સન્તિ મેઽગ્રતઃ ॥ ૩૬॥

સુન્દરીવીક્ષણં કર્મ કુરુ કાલિ પ્રિયે શિવે ।
ધ્યાનં મુઞ્ચ મહાદેવિ તા ગચ્છન્તિ ગૃહં પ્રતિ ॥ ૩૭॥

તવ રૂપં મહાકાલિ મહાકાલપ્રિયઙ્કરમ્ ।
એતાસાં સુન્દરં રૂપં ત્રૈલોક્યપ્રિયકારકમ્ ॥ ૩૮॥

એવં માયાભ્રમાવિષ્ટો મહાકાલો વદન્નિતિ ।
ઇતિ કાલવચઃ શ્રુત્વા કાલં પ્રાહ ચ કાલિકા ॥ ૩૯॥

માયયાઽઽચ્છાદ્ય ચાત્માનં નિજસ્ત્રીરૂપધારિણી ।
ઇતઃ પ્રભૃતિ સ્ત્રીમાત્રં ભવિષ્યતિ યુગે યુગે ॥ ૪૦॥

વલ્લ્યાદ્યૌષધયો દેવિ દિવા વલ્લીસ્વરૂપતામ્ ।
રાત્રૌ સ્ત્રીરૂપમાસાદ્ય રતિકેલિઃ પરસ્પરમ્ ॥ ૪૧॥

અજ્ઞાનં ચૈવ સર્વેષાં ભવિષ્યતિ યુગે યુગે ।
એવં શાપં ચ દત્વા તુ પુનઃ પ્રોવાચ કાલિકા ॥ ૪૨॥

વિપરીતરતિં કૃત્વા ચિન્તયન્તિ મનન્તિ યે ।
તેષાં વરં પ્રદાસ્યામિ નિત્યં તત્ર વસામ્યહમ્ ॥ ૪૩॥

ઇત્યુક્ત્વા કાલિકા વિદ્યા તત્રૈવાન્તરધીયત ।
ત્રિંશત્-ત્રિખર્વ-ષડ્વૃન્દ-નવત્યર્બુદકોટયઃ ॥ ૪૪॥

દર્શનાર્થં તપસ્તેપે સા વૈ કુત્ર ગતા પ્રિયા ।
મમ પ્રાણપ્રિયા દેવી હાહા પ્રાણપ્રિયે શિવે ॥ ૪૫॥

કિં કરોમિ ક્વ ગચ્છામિ ઇત્યેવં ભ્રમસઙ્કુલઃ ।
તસ્યાઃ કાલ્યા દયા જાતા મમ ચિન્તાપરઃ શિવઃ ॥ ૪૬॥

યન્ત્રપ્રસ્તારબુદ્ધિસ્તુ કાલ્યા દત્તાતિસત્વરમ્ ।
યન્ત્રયાગં તદારભ્ય પૂર્વં ચિદ્ઘનગોચરા ॥ ૪૭॥

શ્રીચક્રં યન્ત્રપ્રસ્તારરચનાભ્યાસતત્પરઃ ।
ઇતસ્તતો ભ્રમ્યમાણસ્ત્રૈલોક્યં ચક્રમધ્યકમ્ ॥ ૪૮॥

ચક્રપારદર્શનાર્થં કોટ્યર્બુદયુગં ગતમ્ ।
ભક્તપ્રાણપ્રિયા દેવી મહાશ્રીચક્રનાયિકા ॥ ૪૯॥

તત્ર બિન્દૌ પરં રૂપં સુન્દરં સુમનોહરમ્ ।
રૂપં જાતં મહેશાનિ જાગ્રત્ત્રિપુરસુન્દરિ ॥ ૫૦॥

રૂપં દૃષ્ટ્વા મહાદેવો રાજરાજેશ્વરોઽભવત્ ।
તસ્યાઃ કટાક્ષમાત્રેણ તસ્યા રૂપધરઃ શિવઃ ॥ ૫૧॥

વિના શ‍ृङ્ગારસંયુક્તા તદા જાતા મહેશ્વરી ।
વિના કાલ્યંશતો દેવિ જગત્સ્થાવરજઙ્ગમમ્ ॥ ૫૨॥

ન શ‍ृङ્ગારો ન શક્તિત્વં ક્વાપિ નાસ્તિ મહેશ્વરી ।
સુન્દર્યા પ્રાર્થિતા કાલી તુષ્ટા પ્રોવાચ કાલિકા ॥ ૫૩॥

સર્વાસાં નેત્રકેશેષુ મમાંશોઽત્ર ભવિષ્યતિ ।
પૂર્વાવસ્થાસુ દેવેશિ મમાંશસ્તિષ્ઠતિ પ્રિયે ॥ ૫૪॥

સાવસ્થા તરુણાખ્યા તુ તદન્તે નૈવ તિષ્ઠતિ ।
મદ્ભક્તાનાં મહેશાનિ સદા તિષ્ઠતિ નિશ્ચિતમ્ ॥ ૫૫॥

શક્તિસ્તુ કુણ્ઠિતા જાતા તથા રૂપં ન સુન્દરમ્ ।
ચિન્તાવિષ્ટા તુ મલિના જાતા તત્ર ચ સુન્દરી ॥ ૫૬॥

ક્ષણં સ્થિત્વા ધ્યાનપરા કાલી ચિન્તનતત્પરા ।
તદા કાલી પ્રસન્નાઽભૂત્ ક્ષણાર્દ્ધેન મહેશ્વરી ॥ ૫૭॥

વરં બ્રૂહિ વરં બ્રૂહિ વરં બ્રૂહીતિ સાદરમ્ ।
સુન્દર્યુવાચ ।
મમ સિદ્ધિવરં દેહિ વરોઽયં પ્રાર્થ્યતે મયા ॥ ૫૮॥

તાદૃગુપાયં કથય યેન શક્તિર્ભવિષ્યતિ ।
શ્રીકાલ્યુવાચ ।
મમ નામસાહસ્રં ચ મયા પૂર્વં વિનિર્મિતમ્ ॥ ૫૯॥

મત્સ્વરૂપં કકારાખ્યં મેધાસામ્રાજ્યનામકમ્ ।
વરદાનાભિધં નામ ક્ષણાર્દ્ધાદ્વરદાયકમ્ ॥ ૬૦॥

તત્પઠસ્વ મહામાયે તવ શક્તિર્ભવિષ્યતિ ।
તતઃ પ્રભૃતિ શ્રીવિદ્યા તન્નામપાઠતત્પરા ॥ ૬૧॥

તદેવ નામસાહસ્રં સુન્દરીશક્તિદાયકમ્ ।
કથ્યતે પરયા ભક્ત્યા સાધયે સુમહેશ્વરિ ॥ ૬૨॥

મદ્યૈર્માંસૈસ્તથા શુક્રૈર્બહુરક્તૈરપિ પ્રિયે ।

તર્પયેત્ પૂજયેત્ કાલીં વિપરીતરતિં ચરેત્ ॥ ૬૩॥

વિપરીતરતૌ દેવિ કાલી તિષ્ઠતિ નિત્યશઃ ।
માધ્વીકપુષ્પશુક્રાન્નમૈથુનાદ્યા વિરાગિણી ॥ ૬૪॥

વૈષ્ણવી વ્યાપિકા વિદ્યા શ્મશાનવાસિની પરા ।
વીરસાધનસન્તુષ્ટા વીરાસ્ફાલનનાદિની ॥ ૬૫॥

શિવાબલિપ્રહૃષ્ટાત્મા શિવારૂપાદ્યચણ્ડિકા ।
કામસ્તોત્રપ્રિયાત્યુગ્રમાનસા કામરૂપિણી ॥ ૬૬॥

બ્રહ્માનન્દપરા શમ્ભુ મૈથુનાનન્દતોષિતા ।
યોગીન્દ્રહૃદયાગારા દિવા નિશિ વિપર્યયા ॥ ૬૭॥

ક્ષણં તુષ્ટા ચ પ્રત્યક્ષા દન્તમાલાજપપ્રિયા ।
શય્યાયાં ચુમ્બનાઙ્ગઃ સન્ વેશ્યાસઙ્ગપરાયણઃ ॥ ૬૮॥

ખડ્ગહસ્તો મુક્તકેશો દિગમ્બરવિભૂષિતઃ ।
પઠેન્નામસહસ્રાખ્યં મેધાસામ્રાજ્યનામકમ્ ॥ ૬૯॥

યથા દિવ્યામૃતૈર્દેવાઃ પ્રસન્ના ક્ષણમાત્રતઃ ।
તથાઽનેન મહાકાલી પ્રસન્ના પાઠમાત્રતઃ ॥ ૭૦॥

કથ્યતે નામસાહસ્રં સાવધાનમનાઃ શ◌ૃણુ ।
સર્વસામ્રાજ્યમેધાખ્યનામસાહસ્રકસ્ય ચ ॥ ૭૧॥

મહાકાલ ઋષિઃ પ્રોક્ત ઉષ્ણિક્છન્દઃ પ્રકીર્તિતમ્ ।
દેવતા દક્ષિણા કાલી માયાબીજં પ્રકીર્તિતમ્ ॥ ૭૨॥

હૂઁ શક્તિઃ કાલિકાબીજં કીલકં પરિકીર્તિતમ્ ।
કાલિકા વરદાનાદિ-સ્વેષ્ટાર્થે વિનિયોગતઃ ॥ ૭૩॥

કીલકેન ષડઙ્ગાનિ ષડ્દીર્ઘાબીજેન કારયેત્ ।
ધ્યાનં ચ પૂર્વવત્કૃત્વા સાધયેદિષ્ટસાધનમ્ ॥ ૭૪॥

ૐ અસ્ય શ્રીસર્વસામ્રાજ્યમેધાકાલીસ્વરૂપ-
કકારાત્મકસહસ્રનામસ્તોત્રમન્ત્રસ્ય મહાકાલ-
ઋષિરુષ્ણિક્છન્દઃ, શ્રીદક્ષિણકાલી દેવતા, હ્રીં બીજમ્,
હૂઁ શક્તિઃ, ક્રીં કીલકં, કાલીવરદાનાદિસ્વેષ્ટાર્થે જપે વિનિયોગઃ ।
ૐ મહાકાલ ઋષયે નમઃ શિરસિ ।

ઉષ્ણિક્છન્દસે નમઃ મુખે ।
શ્રી દક્ષિણકાલીદેવતાયૈ નમઃ હૃદયે ।
હ્રીં બીજાય નમઃ ગુહ્યે ।
હૂઁ શક્તયે નમઃ પાદયોઃ ।
ક્રીં કીલકાય નમઃ નાભૌ ।
વિનિયોગાય નમઃ સર્વાઙ્ગે । ઇતિ ઋષ્યાદિન્યાસઃ ।
ૐ ક્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ક્રીં તર્જનીભ્યાં નમઃ ।
ૐ ક્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ ક્રૈં અનામિકાભ્યાં નમઃ ।
ૐ ક્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ક્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ । ઇતિ કરાઙ્ગન્યાસઃ ।
ૐ ક્રાં હૃદયાય નમઃ ।
ૐ ક્રીં શિરસે સ્વાહા ।
ૐ ક્રૂં શિખાયૈ વષટ્ ।
ૐ ક્રૈં કવચાય હું ।
ૐ ક્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ ક્રઃ અસ્ત્રાય ફટ્ । ઇતિ હૃદયાદિ ષડઙ્ગન્યાસઃ ।
અથ ધ્યાનમ્ ।
ૐ કરાલવદનાં ઘોરાં મુક્તકેશીં ચતુર્ભુજામ્ ।
કાલિકાં દક્ષિણાં દિવ્યાં મુણ્ડમાલાવિભૂષિતામ્ ॥

સદ્યશ્છિન્નશિરઃખડ્ગવામોર્ધ્વાધઃકરામ્બુજામ્ ।
અભયં વરદં ચૈવ દક્ષિણાધોર્ધ્વપાણિકામ્ ॥

મહામેઘપ્રભાં શ્યામાં તથા ચૈવ દિગમ્બરામ્ ।
કણ્ઠાવસક્તમુણ્ડાલીગલદ્રુધિરચર્ચિતામ્ ॥

કર્ણાવતંસતાનીતશવયુગ્મભયાનકામ્ ।
ઘોરદંષ્ટ્રાકરાલાસ્યાં પીનોન્નતપયોધરામ્ ॥

શવાનાં કરસઙ્ઘાતૈઃ કૃતકાઞ્ચીં હસન્મુખીમ્ ।
સૃક્કદ્વયગલદ્રક્તધારાવિસ્ફુરિતાનનામ્ ॥

ઘોરરૂપાં મહારૌદ્રીં શ્મશાનાલયવાસિનીમ્ ।

દન્તુરાં દક્ષિણવ્યાપિમુક્તલમ્બકચોચ્ચયામ્ ॥

શવરૂપમહાદેવહૃદયોપરિ સંસ્થિતામ્ ।
શિવાભિર્ઘોરરૂપાભિશ્ચતુર્દિક્ષુ સમન્વિતામ્ ॥

મહાકાલેન સાર્ધોર્ધમુપવિષ્ટરતાતુરામ્ ।
સુખપ્રસન્નવદનાં સ્મેરાનનસરોરુહામ્ ॥

એવં સઙ્ચિન્તયેદ્દેવીં શ્મશાનાલયવાસિનીમ્ ॥

અથ સહસ્રનામસ્તોત્ર પ્રારમ્ભઃ ।
ૐ ક્રીં કાલી ક્રૂં કરાલી ચ કલ્યાણી કમલા કલા ।
કલાવતી કલાઢ્યા ચ કલાપૂજ્યા કલાત્મિકા ॥ ૧॥

કલાદૃષ્ટા કલાપુષ્ટા કલામસ્તા કલાધરા ।
કલાકોટિ કલાભાસા કલાકોટિપ્રપૂજિતા ॥ ૨॥

કલાકર્મકલાધારા કલાપારા કલાગમા ।
કલાધારા કમલિની કકારા કરુણા કવિઃ ॥ ૩॥

કકારવર્ણસર્વાઙ્ગી કલાકોટિવિભૂષિતા ।
કકારકોટિગુણિતા કલાકોટિવિભૂષણા ॥ ૪॥

કકારવર્ણહૃદયા કકારમનુમણ્ડિતા ।
કકારવર્ણનિલયા કાકશબ્દપરાયણા ॥ ૫॥

કકારવર્ણમુકુટા કકારવર્ણભૂષણા ।
કકારવર્ણરૂપા ચ કકશબ્દપરાયણા ॥ ૬॥

કકવીરાસ્ફાલરતા કમલાકરપૂજિતા ।
કમલાકરનાથા ચ કમલાકરરૂપધૃક્ ॥ ૭॥

કમલાકરસિદ્ધિસ્થા કમલાકરપારદા ।
કમલાકરમધ્યસ્થા કમલાકરતોષિતા ॥ ૮॥

કથઙ્કારપરાલાપા કથઙ્કારપરાયણા ।
કથઙ્કારપદાન્તસ્થા કથઙ્કારપદાર્થભૂઃ ॥ ૯॥

કમલાક્ષી કમલજા કમલાક્ષપ્રપૂજિતા ।
કમલાક્ષવરોદ્યુક્તા કકારા કર્બુરાક્ષરા ॥ ૧૦॥

કરતારા કરચ્છિન્ના કરશ્યામા કરાર્ણવા ।
કરપૂજ્યા કરરતા કરદા કરપૂજિતા ॥ ૧૧॥

કરતોયા કરામર્ષા કર્મનાશા કરપ્રિયા ।
કરપ્રાણા કરકજા કરકા કરકાન્તરા ॥ ૧૨॥

કરકાચલરૂપા ચ કરકાચલશોભિની ।
કરકાચલપુત્રી ચ કરકાચલતોષિતા ॥ ૧૩॥

કરકાચલગેહસ્થા કરકાચલરક્ષિણી ।
કરકાચલસમ્માન્યા કરકાચલકારિણી ॥ ૧૪॥

કરકાચલવર્ષાઢ્યા કરકાચલરઞ્જિતા ।
કરકાચલકાન્તારા કરકાચલમાલિની ॥ ૧૫॥

કરકાચલભોજ્યા ચ કરકાચલરૂપિણી ।
કરામલકસંસ્થા ચ કરામલકસિદ્ધિદા ॥ ૧૬॥

કરામલકસમ્પૂજ્યા કરામલકતારિણી ।
કરામલકકાલી ચ કરામલકરોચિની ॥ ૧૭॥

કરામલકમાતા ચ કરામલકસેવિની ।
કરામલકબદ્ધ્યેયા કરામલકદાયિની ॥ ૧૮॥

કઞ્જનેત્રા કઞ્જગતિઃ કઞ્જસ્થા કઞ્જધારિણી ।
કઞ્જમાલાપ્રિયકરી કઞ્જરૂપા ચ કઞ્જના ॥ ૧૯॥

કઞ્જજાતિઃ કઞ્જગતિઃ કઞ્જહોમપરાયણા ।
કઞ્જમણ્ડલમધ્યસ્થા કઞ્જાભરણભૂષિતા ॥ ૨૦॥

કઞ્જસમ્માનનિરતા કઞ્જોત્પત્તિપરાયણા ।
કઞ્જરાશિસમાકારા કઞ્જારણ્યનિવાસિની ॥ ૨૧॥

કરઞ્જવૃક્ષમધ્યસ્થા કરઞ્જવૃક્ષવાસિની ।
કરઞ્જફલભૂષાઢ્યા કરઞ્જારણ્યવાસિની ॥ ૨૨॥

કરઞ્જમાલાભરણા કરવાલપરાયણા ।
કરવાલપ્રહૃષ્ટાત્મા કરવાલપ્રિયા ગતિઃ ॥ ૨૩॥

કરવાલપ્રિયા કન્યા કરવાલવિહારિણી ।
કરવાલમયી કર્મા કરવાલપ્રિયઙ્કરી ॥ ૨૪॥

કબન્ધમાલાભરણા કબન્ધરાશિમધ્યગા ।
કબન્ધકૂટસંસ્થાના કબન્ધાનન્તભૂષણા ॥ ૨૫॥

કબન્ધનાદસન્તુષ્ટા કબન્ધાસનધારિણી ।
કબન્ધગૃહમધ્યસ્થા કબન્ધવનવાસિની ॥ ૨૬॥

કબન્ધકાઞ્ચીકરણી કબન્ધરાશિભૂષણા ।
કબન્ધમાલાજયદા કબન્ધદેહવાસિની ॥ ૨૭॥

કબન્ધાસનમાન્યા ચ કપાલાકલ્પધારિણી ।
કપાલમાલામધ્યસ્થા કપાલવ્રતતોષિતા ॥ ૨૮॥

કપાલદીપસન્તુષ્ટા કપાલદીપરૂપિણી ।
કપાલદીપવરદા કપાલકજ્જલસ્થિતા ॥ ૨૯॥

કપાલમાલાજયદા કપાલજપતોષિણી ।
કપાલસિદ્ધિસંહૃષ્ટા કપાલભોજનોદ્યતા ॥ ૩૦॥

કપાલવ્રતસંસ્થાના કપાલકમલાલયા ।
કવિત્વામૃતસારા ચ કવિત્વામૃતસાગરા ॥ ૩૧॥

કવિત્વસિદ્ધિસંહૃષ્ટા કવિત્વાદાનકારિણી ।
કવિપૂજ્યા કવિગતિઃ કવિરૂપા કવિપ્રિયા ॥ ૩૨॥

કવિબ્રહ્માનન્દરૂપા કવિત્વવ્રતતોષિતા ।
કવિમાનસસંસ્થાના કવિવાઞ્છાપ્રપૂરિણી ॥ ૩૩॥

કવિકણ્ઠસ્થિતા કં હ્રીં કંકંકં કવિપૂર્તિદા ।
કજ્જલા કજ્જલાદાનમાનસા કજ્જલપ્રિયા ॥ ૩૪॥

કપાલકજ્જલસમા કજ્જલેશપ્રપૂજિતા ।
કજ્જલાર્ણવમધ્યસ્થા કજ્જલાનન્દરૂપિણી ॥ ૩૫॥

કજ્જલપ્રિયસન્તુષ્ટા કજ્જલપ્રિયતોષિણી ।
કપાલમાલાભરણા કપાલકરભૂષણા ॥ ૩૬॥

કપાલકરભૂષાઢ્યા કપાલચક્રમણ્ડિતા ।
કપાલકોટિનિલયા કપાલદુર્ગકારિણી ॥ ૩૭॥

કપાલગિરિસંસ્થાના કપાલચક્રવાસિની ।

કપાલપાત્રસન્તુષ્ટા કપાલાર્ઘ્યપરાયણા ॥ ૩૮॥

કપાલાર્ઘ્યપ્રિયપ્રાણા કપાલાર્ઘ્યવરપ્રદા ।
કપાલચક્રરૂપા ચ કપાલરૂપમાત્રગા ॥ ૩૯॥

કદલી કદલીરૂપા કદલીવનવાસિની ।
કદલીપુષ્પસમ્પ્રીતા કદલીફલમાનસા ॥ ૪૦॥

કદલીહોમસન્તુષ્ટા કદલીદર્શનોદ્યતા ।
કદલીગર્ભમધ્યસ્થા કદલીવનસુન્દરી ॥ ૪૧॥

કદમ્બપુષ્પનિલયા કદમ્બવનમધ્યગા ।
કદમ્બકુસુમામોદા કદમ્બવનતોષિણી ॥ ૪૨॥

કદમ્બપુષ્પસમ્પૂજ્યા કદમ્બપુષ્પહોમદા ।
કદમ્બપુષ્પમધ્યસ્થા કદમ્બફલભોજિની ॥ ૪૩॥

કદમ્બકાનનાન્તઃસ્થા કદમ્બાચલવાસિની ।
કચ્છપા કચ્છપારાધ્યા કચ્છપાસનસંસ્થિતા ॥ ૪૪॥

કર્ણપૂરા કર્ણનાસા કર્ણાઢ્યા કાલભૈરવી ।
કલપ્રીતા કલહદા કલહા કલહાતુરા ॥ ૪૫॥

કર્ણયક્ષી કર્ણવાર્તા કથિની કર્ણસુન્દરી ।
કર્ણપિશાચિની કર્ણમઞ્જરી કવિકક્ષદા ॥ ૪૬॥

કવિકક્ષાવિરૂપાઢ્યા કવિકક્ષસ્વરૂપિણી ।
કસ્તૂરીમૃગસંસ્થાના કસ્તૂરીમૃગરૂપિણી ॥ ૪૭॥

કસ્તૂરીમૃગસન્તોષા કસ્તૂરીમૃગમધ્યગા ।
કસ્તૂરીરસનીલાઙ્ગી કસ્તૂરીગન્ધતોષિતા ॥ ૪૮॥

કસ્તૂરીપૂજકપ્રાણા કસ્તૂરીપૂજકપ્રિયા ।
કસ્તૂરીપ્રેમસન્તુષ્ટા કસ્તૂરીપ્રાણધારિણી ॥ ૪૯॥

કસ્તૂરીપૂજકાનન્દા કસ્તૂરીગન્ધરૂપિણી ।
કસ્તૂરીમાલિકારૂપા કસ્તૂરીભોજનપ્રિયા ॥ ૫૦॥

કસ્તૂરીતિલકાનન્દા કસ્તૂરીતિલકપ્રિયા ।
કસ્તૂરીહોમસન્તુષ્ટા કસ્તૂરીતર્પણોદ્યતા ॥ ૫૧॥

કસ્તૂરીમાર્જનોદ્યુક્તા કસ્તૂરીચક્રપૂજિતા ।
કસ્તૂરીપુષ્પસમ્પૂજ્યા કસ્તૂરીચર્વણોદ્યતા ॥ ૫૨॥

કસ્તૂરીગર્ભમધ્યસ્થા કસ્તૂરીવસ્ત્રધારિણી ।
કસ્તૂરીકામોદરતા કસ્તૂરીવનવાસિની ॥ ૫૩॥

કસ્તૂરીવનસંરક્ષા કસ્તૂરીપ્રેમધારિણી ।
કસ્તૂરીશક્તિનિલયા કસ્તૂરીશક્તિકુણ્ડગા ॥ ૫૪॥

કસ્તૂરીકુણ્ડસંસ્નાતા કસ્તૂરીકુણ્ડમજ્જના ।
કસ્તૂરીજીવસન્તુષ્ટા કસ્તૂરીજીવધારિણી ॥ ૫૫॥

કસ્તૂરીપરમામોદા કસ્તૂરીજીવનક્ષમા ।
કસ્તૂરીજાતિભાવસ્થા કસ્તૂરીગન્ધચુમ્બના ॥ ૫૬॥

કસતૂરીગન્ધસંશોભાવિરાજિતકપાલભૂઃ ।
કસ્તૂરીમદનાન્તઃસ્થા કસ્તૂરીમદહર્ષદા ॥ ૫૭॥

કસ્તૂરીકવિતાનાઢ્યા કસ્તૂરીગૃહમધ્યગા ।
કસ્તૂરીસ્પર્શકપ્રાણા કસ્તૂરીવિન્દકાન્તકા ॥ ૫૮॥

કસ્તૂર્ય્યામોદરસિકા કસ્તૂરીક્રીડનોદ્યતા ।
કસ્તૂરીદાનનિરતા કસ્તૂરીવરદાયિની ॥ ૫૯॥

કસ્તૂરીસ્થાપનાસક્તા કસ્તૂરીસ્થાનરઞ્જિની ।
કસ્તૂરીકુશલપ્રશ્ના કસ્તૂરીસ્તુતિવન્દિતા ॥ ૬૦॥

કસ્તૂરીવન્દકારાધ્યા કસ્તૂરીસ્થાનવાસિની ।
કહરૂપા કહાઢ્યા ચ કહાનન્દા કહાત્મભૂઃ ॥ ૬૧॥

કહપૂજ્યા કહાખ્યા ચ કહહેયા કહાત્મિકા ।
કહમાલાકણ્ઠભૂષા કહમન્ત્રજપોદ્યતા ॥ ૬૨॥

કહનામસ્મૃતિપરા કહનામપરાયણા ।
કહપરાયણરતા કહદેવી કહેશ્વરી ॥ ૬૩॥

કહહેતુ કહાનન્દા કહનાદપરાયણા ।
કહમાતા કહાન્તઃસ્થા કહમન્ત્રા કહેશ્વરી ॥ ૬૪॥

કહજ્ઞેયા કહારાધ્યા કહધ્યાનપરાયણા ।
કહતન્ત્રા કહકહા કહચર્ય્યાપરાયણા ॥ ૬૫॥

કહાચારા કહગતિઃ કહતાણ્ડવકારિણી ।
કહારણ્યા કહરતિઃ કહશક્તિપરાયણા ॥ ૬૬॥

કહરાજ્યનતા કર્મસાક્ષિણી કર્મસુન્દરી ।
કર્મવિદ્યા કર્મગતિઃ કર્મતન્ત્રપરાયણા ॥ ૬૭॥

કર્મમાત્રા કર્મગાત્રા કર્મધર્મપરાયણા ।
કર્મરેખાનાશકર્ત્રી કર્મરેખાવિનોદિની ॥ ૬૮॥

કર્મરેખામોહકરી કર્મકીર્તિપરાયણા ।
કર્મવિદ્યા કર્મસારા કર્માધારા ચ કર્મભૂઃ ॥ ૬૯॥

કર્મકારી કર્મહારી કર્મકૌતુકસુન્દરી ।
કર્મકાલી કર્મતારા કર્મચ્છિન્ના ચ કર્મદા ॥ ૭૦॥

કર્મચાણ્ડાલિની કર્મવેદમાતા ચ કર્મભૂઃ ।
કર્મકાણ્ડરતાનન્તા કર્મકાણ્ડાનુમાનિતા ॥ ૭૧॥

કર્મકાણ્ડપરીણાહા કમઠી કમઠાકૃતિઃ ।
કમઠારાધ્યહૃદયા કમઠાકણ્ઠસુન્દરી ॥ ૭૨॥

કમઠાસનસંસેવ્યા કમઠી કર્મતત્પરા ।
કરુણાકરકાન્તા ચ કરુણાકરવન્દિતા ॥ ૭૩॥

કઠોરા કરમાલા ચ કઠોરકુચધારિણી ।
કપર્દિની કપટિની કઠિના કઙ્કભૂષણા ॥ ૭૪॥

કરભોરૂઃ કઠિનદા કરભા કરભાલયા ।
કલભાષામયી કલ્પા કલ્પના કલ્પદાયિની ॥ ૭૫॥

કમલસ્થા કલામાલા કમલાસ્યા ક્કણત્પ્રભા ।
કકુદ્મિની કષ્ટવતી કરણીયકથાર્ચિતા ॥ ૭૬॥

કચાર્ચિતા કચતનુઃ કચસુન્દરધારિણી ।
કઠોરકુચસંલગ્ના કટિસૂત્રવિરાજિતા ॥ ૭૭॥

કર્ણભક્ષપ્રિયા કન્દા કથાકન્દગતિઃ કલિઃ ।
કલિઘ્ની કલિદૂતી ચ કવિનાયક-પૂજિતા ॥ ૭૮॥

કણકક્ષાનિયન્ત્રી ચ કશ્ચિત્કવિવરાર્ચિતા ।

કર્ત્રી ચ કર્તૃકા ભૂષાકારિણી કર્ણશત્રુપા ॥ ૭૯॥

કરણેશી કરણપા કલવાચા કલાનિધિઃ ।
કલના કલનાધારા કલના કારિકા કરા ॥ ૮૦॥

કલગેયા કર્કરાશિઃ કર્કરાશિ-પ્રપૂજિતા ।
કન્યારાશિઃ કન્યકા ચ કન્યકાપ્રિયભાષિણી ॥ ૮૧॥

કન્યકાદાનસન્તુષ્ટા કન્યકાદાનતોષિણી ।
કન્યાદાનકરાનન્દા કન્યાદાનગ્રહેષ્ટદા ॥ ૮૨॥

કર્ષણા કક્ષદહના કામિતા કમલાસના ।
કરમાલાનન્દકર્ત્રી કરમાલાપ્રપોષિતા ॥ ૮૩॥

કરમાલાશયાનન્દા કરમાલાસમાગમા ।
કરમાલાસિદ્ધિદાત્રી કરમાલાકરપ્રિયા ॥ ૮૪॥

કરપ્રિયા કરરતા કરદાનપરાયણા ।
કલાનન્દા કલિગતિઃ કલિપૂજ્યા કલિપ્રસૂઃ ॥ ૮૫॥

કલનાદનિનાદસ્થા કલનાદવરપ્રદા ।
કલનાદસમાજસ્થા કહોલા ચ કહોલદા ॥ ૮૬॥

કહોલગેહમધ્યસ્થા કહોલવરદાયિની ।
કહોલકવિતાધારા કહોલઋષિમાનિતા ॥ ૮૭॥

કહોલમાનસારાધ્યા કહોલવાક્યકારિણી ।
કર્તૃરૂપા કર્તૃમયી કર્તૃમાતા ચ કર્તરી ॥ ૮૮॥

કનીયા કનકારાધ્યા કનીનકમયી તથા ।
કનીયાનન્દનિલયા કનકાનન્દતોષિતા ॥ ૮૯॥

કનીયકકરાકાષ્ઠા કથાર્ણવકરી કરી ।
કરિગમ્યા કરિગતિઃ કરિધ્વજપરાયણા ॥ ૯૦॥

કરિનાથપ્રિયાકણ્ઠા કથાનકપ્રતોષિતા ।
કમનીયા કમનકા કમનીયવિભૂષણા ॥ ૯૧॥

કમનીયસમાજસ્થા કમનીયવ્રતપ્રિયા ।
કમનીયગુણારાધ્યા કપિલા કપિલેશ્વરી ॥ ૯૨॥

કપિલારાધ્યહૃદયા કપિલાપ્રિયવાદિની ।
કહચક્રમન્ત્રવર્ણા કહચક્રપ્રસૂનકા ॥ ૯૩ ॥

કએઈલહ્રીંસ્વરૂપા ચ કએઈલહ્રીંવરપ્રદા ।
કએઈલહ્રીંસિદ્ધિદાત્રી કએઈલહ્રીંસ્વરૂપિણી ॥ ૯૪ ॥

કએઈલહ્રીંમન્ત્રવર્ણા કએઈલહ્રીંપ્રસૂકલા ।
કવર્ગા ચ કપાટસ્થા કપાટોદ્ઘાટનક્ષમા ॥ ૯૫ ॥

કઙ્કાલી ચ કપાલી ચ કઙ્કાલપ્રિયભાષિણી ।
કઙ્કાલભૈરવારાધ્યા કઙ્કાલમાનસંસ્થિતા ॥ ૯૬ ॥

કઙ્કાલમોહનિરતા કઙ્કાલમોહદાયિની ।
કલુષઘ્ની કલુષહા કલુષાર્તિવિનાશિની ॥ ૯૭ ॥

કલિપુષ્પા કલાદાના કશિપુઃ કશ્યપાર્ચિતા ।
કશ્યપા કશ્યપારાધ્યા કલિપૂર્ણકલેવરા ॥ ૯૮ ॥

કલેશ્વરકરી કાઞ્ચી કવર્ગા ચ કરાલકા ।
કરાલભૈરવારાધ્યા કરાલભૈરવેશ્વરી ॥ ૯૯ ॥

કરાલા કલનાધારા કપર્દીશવરપ્રદા ।
કપર્દીશપ્રેમલતા કપર્દિમાલિકાયુતા ॥ ૧૦૦ ॥

કપર્દિજપમાલાઢ્યા કરવીરપ્રસૂનદા ।
કરવીરપ્રિયપ્રાણા કરવીરપ્રપૂજિતા ॥ ૧૦૧ ॥

કર્ણિકારસમાકારા કર્ણિકારપ્રપૂજિતા ।
કરિષાગ્નિસ્થિતા કર્ષા કર્ષમાત્રસુવર્ણદા ॥ ૧૦૨ ॥

કલશા કલશારાધ્યા કષાયા કરિગાનદા ।
કપિલા કલકણ્ઠી ચ કલિકલ્પલતા મતા ॥ ૧૦૩ ॥

કલ્પલતા કલ્પમાતા કલ્પકારી ચ કલ્પભૂઃ ।
કર્પૂરામોદરુચિરા કર્પૂરામોદધારિણી ॥ ૧૦૪ ॥

કર્પૂરમાલાભરણા કર્પૂરવાસપૂર્તિદા ।
કર્પૂરમાલાજયદા કર્પૂરાર્ણવમધ્યગા ॥ ૧૦૫ ॥

કર્પૂરતર્પણરતા કટકામ્બરધારિણી ।
કપટેશ્વવરસમ્પૂજ્યા કપટેશ્વરરૂપિણી ॥ ૧૦૬ ॥

કટુઃ કપિધ્વજારાધ્યા કલાપપુષ્પધારિણી ।
કલાપપુષ્પરુચિરા કલાપપુષ્પપૂજિતા ॥ ૧૦૭॥

ક્રકચા ક્રકચારાધ્યા કથમ્બ્રૂમા કરાલતા ।
કથઙ્કારવિનિર્મુક્તા કાલી કાલક્રિયા ક્રતુઃ ॥ ૧૦૮॥

કામિની કામિનીપૂજ્યા કામિનીપુષ્પધારિણી ।
કામિનીપુષ્પનિલયા કામિનીપુષ્પપૂર્ણિમા ॥ ૧૦૯॥

કામિનીપુષ્પપૂજાર્હા કામિનીપુષ્પભૂષણા ।
કામિનીપુષ્પતિલકા કામિનીકુણ્ડચુમ્બના ॥ ૧૧૦॥

કામિનીયોગસન્તુષ્ટા કામિનીયોગભોગદા ।
કામિનીકુણ્ડસમ્મગ્ના કામિનીકુણ્ડમધ્યગા ॥ ૧૧૧॥

કામિનીમાનસારાધ્યા કામિનીમાનતોષિતા ।
કામિનીમાનસઞ્ચારા કાલિકા કાલકાલિકા ॥ ૧૧૨॥

કામા ચ કામદેવી ચ કામેશી કામસમ્ભવા ।
કામભાવા કામરતા કામાર્તા કામમઞ્જરી ॥ ૧૧૩॥

કામમઞ્જીરરણિતા કામદેવપ્રિયાન્તરા ।
કામકાલી કામકલા કાલિકા કમલાર્ચિતા ॥ ૧૧૪॥

કાદિકા કમલા કાલી કાલાનલસમપ્રભા ।
કલ્પાન્તદહના કાન્તા કાન્તારપ્રિયવાસિની ॥ ૧૧૫॥

કાલપૂજ્યા કાલરતા કાલમાતા ચ કાલિની ।
કાલવીરા કાલઘોરા કાલસિદ્ધા ચ કાલદા ॥ ૧૧૬॥

કાલઞ્જનસમાકારા કાલઞ્જરનિવાસિની ।
કાલઋદ્ધિઃ કાલવૃદ્ધિઃ કારાગૃહવિમોચિની ॥ ૧૧૭॥

કાદિવિદ્યા કાદિમાતા કાદિસ્થા કાદિસુન્દરી ।
કાશી કાઞ્ચી ચ કાઞ્ચીશા કાશીશવરદાયિની ॥ ૧૧૮॥

ક્રાં બીજા ચૈવ ક્રીં બીજા હૃદયાય નમસ્સ્મૃતા ।
કામ્યા કામ્યગતિઃ કામ્યસિદ્ધિદાત્રી ચ કામભૂઃ ॥ ૧૧૯॥

કામાખ્યા કામરૂપા ચ કામચાપવિમોચિની ।

કામદેવકલારામા કામદેવકલાલયા ॥ ૧૨૦॥

કામરાત્રિઃ કામદાત્રી કાન્તારાચલવાસિની ।
કામરૂપા કાલગતિઃ કામયોગપરાયણા ॥ ૧૨૧॥

કામસમ્મર્દનરતા કામગેહવિકાસિની ।
કાલભૈરવભાર્યા ચ કાલભૈરવકામિની ॥ ૧૨૨॥

કાલભૈરવયોગસ્થા કાલભૈરવભોગદા ।
કામધેનુઃ કામદોગ્ધ્રી કામમાતા ચ કાન્તિદા ॥ ૧૨૩॥

કામુકા કામુકારાધ્યા કામુકાનન્દવર્દ્ધિની ।
કાર્ત્તવીર્ય્યા કાર્ત્તિકેયા કાર્ત્તિકેયપ્રપૂજિતા ॥ ૧૨૪॥

કાર્ય્યા કારણદા કાર્ય્યકારિણી કારણાન્તરા ।
કાન્તિગમ્યા કાન્તિમયી કાત્યા કાત્યાયની ચ કા ॥ ૧૨૫॥

કામસારા ચ કાશ્મીરા કાશ્મીરાચારતત્પરા ।
કામરૂપાચારરતા કામરૂપપ્રિયંવદા ॥ ૧૨૬॥

કામરૂપાચારસિદ્ધિઃ કામરૂપમનોમયી ।
કાર્ત્તિકી કાર્ત્તિકારાધ્યા કાઞ્ચનારપ્રસૂનભૂઃ ॥ ૧૨૭॥

કાઞ્ચનારપ્રસૂનાભા કાઞ્ચનારપ્રપૂજિતા ।
કાઞ્ચરૂપા કાઞ્ચભૂમિઃ કાંસ્યપાત્રપ્રભોજિની ॥ ૧૨૮॥

કાંસ્યધ્વનિમયી કામસુન્દરી કામચુમ્બના ।
કાશપુષ્પપ્રતીકાશા કામદ્રુમસમાગમા ॥ ૧૨૯॥

કામપુષ્પા કામભૂમિઃ કામપૂજ્યા ચ કામદા ।
કામદેહા કામગેહા કામબીજપરાયણા ॥ ૧૩૦॥

કામધ્વજસમારૂઢા કામધ્વજસમાસ્થિતા ।
કાશ્યપી કાશ્યપારાધ્યા કાશ્યપાનન્દદાયિની ॥ ૧૩૧॥

કાલિન્દીજલસઙ્કાશા કાલિન્દીજલપૂજિતા ।
કાદેવપૂજાનિરતા કાદેવપરમાર્થદા ॥ ૧૩૨॥

કર્મણા કર્મણાકારા કામકર્મણકારિણી ।
કાર્મ્મણત્રોટનકરી કાકિની કારણાહ્વયા ॥ ૧૩૩॥

કાવ્યામૃતા ચ કાલિઙ્ગા કાલિઙ્ગમર્દનોદ્યતા ।
કાલાગરુવિભૂષાઢ્યા કાલાગરુવિભૂતિદા ॥ ૧૩૪॥

કાલાગરુસુગન્ધા ચ કાલાગરુપ્રતર્પણા ।
કાવેરીનીરસમ્પ્રીતા કાવેરીતીરવાસિની ॥ ૧૩૫॥

કાલચક્રભ્રમાકારા કાલચક્રનિવાસિની ।
કાનના કાનનાધારા કારુઃ કારુણિકામયી ॥ ૧૩૬॥

કામ્પિલ્યવાસિની કાષ્ઠા કામપત્ની ચ કામભૂઃ ।
કાદમ્બરીપાનરતા તથા કાદમ્બરીકલા ॥ ૧૩૭॥

કામવન્દ્યા ચ કામેશી કામરાજપ્રપૂજિતા ।
કામરાજેશ્વરીવિદ્યા કામકૌતુકસુન્દરી ॥ ૧૩૮॥

કામ્બોજજા કાઞ્છિનદા કાંસ્યકાઞ્ચનકારિણી ।
કાઞ્ચનાદ્રિસમાકારા કાઞ્ચનાદ્રિપ્રદાનદા ॥ ૧૩૯॥

કામકીર્તિઃ કામકેશી કારિકા કાન્તરાશ્રયા ।
કામભેદી ચ કામાર્તિનાશિની કામભૂમિકા ॥ ૧૪૦॥

કાલાનલાશિની કાવ્યવનિતા કામરૂપિણી ।
કાયસ્થા કામસન્દીપ્તિઃ કાવ્યદા કાલસુન્દરી ॥ ૧૪૧॥

કામેશી કારણવરા કામેશીપૂજનોદ્યતા ।
કાઞ્ચી-નૂપુરભૂષાઢ્યા-કુઙ્કુમાભરણાન્વિતા ॥ ૧૪૨॥

કાલચક્રા કાલગતિઃ કાલચક્રામનોભવા ।
કુન્દમધ્યા કુન્દપુષ્પા કુન્દપુષ્પપ્રિયા કુજા ॥ ૧૪૩॥

કુજમાતા કુજારાધ્યા કુઠારવરધારિણી ।
કુઞ્ચરસ્થા કુશરતા કુશેશયવિલોચના ॥ ૧૪૪॥

કુમઠી કુરરી કુદ્રા કુરઙ્ગી કુટજાશ્રયા ।
કુમ્ભીનસવિભૂષા ચ કુમ્ભીનસવધોદ્યતા ॥ ૧૪૫॥

કુમ્ભકર્ણમનોલ્લાસા કુલચૂડામણિઃ કુલા ।
કુલાલગૃહકન્યા ચ કુલચૂડામણિપ્રિયા ॥ ૧૪૬॥

કુલપૂજ્યા કુલારાધ્યા કુલપૂજાપરાયણા ।
કુલભૂષા તથા કુક્ષિઃ કુરરીગણસેવિતા ॥ ૧૪૭॥

કુલપુષ્પા કુલરતા કુલપુષ્પપરાયણા ।
કુલવસ્ત્રા કુલારાધ્યા કુલકુણ્ડસમપ્રભા ॥ ૧૪૮॥

કુલકુણ્ડસમોલ્લાસા કુણ્ડપુષ્પપરાયણા ।
કુણ્ડપુષ્પપ્રસન્નાસ્યા કુણ્ડગોલોદ્ભવાત્મિકા ॥ ૧૪૯॥

કુણ્ડગોલોદ્ભવાધારા કુણ્ડગોલમયી કુહૂઃ ।
કુણ્ડગોલપ્રિયપ્રાણા કુણ્ડગોલપ્રપૂજિતા ॥ ૧૫૦॥

કુણ્ડગોલમનોલ્લાસા કુણ્ડગોલબલપ્રદા ।
કુણ્ડદેવરતા ક્રુદ્ધા કુલસિદ્ધિકરા પરા ॥ ૧૫૧॥

કુલકુણ્ડસમાકારા કુલકુણ્ડસમાનભૂઃ ।
કુણ્ડસિદ્ધિઃ કુણ્ડઋદ્ધિઃ કુમારીપૂજનોદ્યતા ॥ ૧૫૨॥

કુમારીપૂજકપ્રાણા કુમારીપૂજકાલયા ।
કુમારીકામસન્તુષ્ટા કુમારીપૂજનોત્સુકા ॥ ૧૫૩॥

કુમારીવ્રતસન્તુષ્ટા કુમારીરૂપધારિણી ।
કુમારીભોજનપ્રીતા કુમારી ચ કુમારદા ॥ ૧૫૪॥

કુમારમાતા કુલદા કુલયોનિઃ કુલેશ્વરી ।
કુલલિઙ્ગા કુલાનન્દા કુલરમ્યા કુતર્કધૃક્ ॥ ૧૫૫॥

કુન્તી ચ કુલકાન્તા ચ કુલમાર્ગપરાયણા ।
કુલ્લા ચ કુરુકુલ્લા ચ કુલ્લુકા કુલકામદા ॥ ૧૫૬॥

કુલિશાઙ્ગી કુબ્જિકા ચ કુબ્જિકાનન્દવર્દ્ધિની ।
કુલીના કુઞ્જરગતિઃ કુઞ્જરેશ્વરગામિની ॥ ૧૫૭॥

કુલપાલી કુલવતી તથૈવ કુલદીપિકા ।
કુલયોગેશ્વરી કુણ્ડા કુઙ્કુમારુણવિગ્રહા ॥ ૧૫૮॥

કુઙ્કુમાનન્દસન્તોષા કુઙ્કુમાર્ણવવાસિની ।
કુસુમા કુસુમપ્રીતા કુલભૂઃ કુલસુન્દરી ॥ ૧૫૯॥

કુમુદ્વતી કુમુદિની કુશલા કુલટાલયા ।
કુલટાલયમધ્યસ્થા કુલટાસઙ્ગતોષિતા ॥ ૧૬૦॥

કુલટાભવનોદ્યુક્તા કુશાવર્તા કુલાર્ણવા ।

કુલાર્ણવાચારરતા કુણ્ડલી કુણ્ડલાકૃતિઃ ॥ ૧૬૧॥

કુમતિશ્ચ કુલશ્રેષ્ઠા કુલચક્રપરાયણા ।
કૂટસ્થા કૂટદૃષ્ટિશ્ચ કુન્તલા કુન્તલાકૃતિઃ ॥ ૧૬૨॥

કુશલાકૃતિરૂપા ચ કૂર્ચબીજધરા ચ કૂઃ ।
કું કું કું કું શબ્દરતા ક્રૂં ક્રૂં ક્રૂં ક્રૂં પરાયણા ॥ ૧૬૩॥

કું કું કું શબ્દનિલયા કુક્કુરાલયવાસિની ।
કુક્કુરાસઙ્ગસંયુક્તા કુક્કુરાનન્તવિગ્રહા ॥ ૧૬૪॥

કૂર્ચારમ્ભા કૂર્ચબીજા કૂર્ચજાપપરાયણા ।
કુલિની કુલસંસ્થાના કૂર્ચકણ્ઠપરાગતિઃ ॥ ૧૬૫॥

કૂર્ચવીણાભાલદેશા કૂર્ચમસ્તકભૂષિતા ।
કુલવૃક્ષગતા કૂર્મા કૂર્માચલનિવાસિની ॥ ૧૬૬॥

કુલબિન્દુઃ કુલશિવા કુલશક્તિપરાયણા ।
કુલબિન્દુમણિપ્રખ્યા કુઙ્કુમદ્રુમવાસિની ॥ ૧૬૭॥

કુચમર્દનસન્તુષ્ટા કુચજાપપરાયણા ।
કુચસ્પર્શનસન્તુષ્ટા કુચાલિઙ્ગનહર્ષદા ॥ ૧૬૮॥

કુમતિઘ્ની કુબેરાર્ચ્યા કુચભૂઃ કુલનાયિકા ।
કુગાયના કુચધરા કુમાતા કુન્દદન્તિની ॥ ૧૬૯॥

કુગેયા કુહરાભાસા કુગેયા કુઘ્નદારિભા ।
કીર્તિઃ કિરાતિની ક્લિન્ના કિન્નરા કિન્નરીક્રિયા ॥ ૧૭૦॥

ક્રીઙ્કારા ક્રીઞ્જપાસક્તા ક્રીં હૂઁ સ્ત્રીં મન્ત્રરૂપિણી ।
કિર્મીરિતદૃશાપાઙ્ગી કિશોરી ચ કિરીટિની ॥ ૧૭૧॥

કીટભાષા કીટયોનિઃ કીટમાતા ચ કીટદા ।
કિંશુકા કીરભાષા ચ ક્રિયાસારા ક્રિયાવતી ॥ ૧૭૨॥

કીંકીંશબ્દપરા ક્લાં ક્લીં ક્લૂઁ ક્લૈં ક્લૌં મન્ત્રરૂપિણી ।
કાઁ કીં કૂઁ કૈં સ્વરૂપા ચ કઃ ફટ્ મન્ત્રસ્વરૂપિણી ॥ ૧૭૩॥

કેતકીભૂષણાનન્દા કેતકીભરણાન્વિતા ।
કૈકદા કેશિની કેશી કેશીસૂદનતત્પરા ॥ ૧૭૪॥

કેશરૂપા કેશમુક્તા કૈકેયી કૌશિકી તથા ।
કૈરવા કૈરવાહ્લાદા કેશરા કેતુરૂપિણી ॥ ૧૭૫ ॥

કેશવારાધ્યહૃદયા કેશવાસક્તમાનસા ।
ક્લૈબ્યવિનાશિની ક્લૈં ચ ક્લૈં બીજજપતોષિતા ॥ ૧૭૬ ॥

કૌશલ્યા કોશલાક્ષી ચ કોશા ચ કોમલા તથા ।
કોલાપુરનિવાસા ચ કોલાસુરવિનાશિની ॥ ૧૭૭ ॥

કોટિરૂપા કોટિરતા ક્રોધિની ક્રોધરૂપિણી ।
કેકા ચ કોકિલા કોટિઃ કોટિમન્ત્રપરાયણા ॥ ૧૭૮ ॥

કોટ્યાનન્તમન્ત્રયુક્તા કૈરૂપા કેરલાશ્રયા ।
કેરલાચારનિપુણા કેરલેન્દ્રગૃહસ્થિતા ॥ ૧૭૯ ॥

કેદારાશ્રમસંસ્થા ચ કેદારેશ્વરપૂજિતા ।
ક્રોધરૂપા ક્રોધપદા ક્રોધમાતા ચ કૌશિકી ॥ ૧૮૦ ॥

કોદણ્ડધારિણી ક્રૌઞ્ચા કૌશલ્યા કૌલમાર્ગગા ।
કૌલિની કૌલિકારાધ્યા કૌલિકાગારવાસિની ॥ ૧૮૧ ॥

કૌતુકી કૌમુદી કૌલા કુમારી કૌરવાર્ચિતા ।
કૌણ્ડિન્યા કૌશિકી ક્રોધા જ્વાલાભાસુરરૂપિણી ॥ ૧૮૨ ॥

કોટિકાલાનલજ્વાલા કોટિમાર્ત્તણ્ડવિગ્રહા ।
કૃત્તિકા કૃષ્ણવર્ણા ચ કૃષ્ણા કૃત્યા ક્રિયાતુરા ॥ ૧૮૩ ॥

કૃશાઙ્ગી કૃતકૃત્યા ચ ક્રઃ ફટ્સ્વાહાસ્વરૂપિણી ।
ક્રૌં ક્રૌં હૂઁ ફટ્મન્ત્રવર્ણા
ક્રાં હ્રીં હૂઁ ફટ્સ્વરૂપિણી ॥ ૧૮૪ ॥

ક્રીંક્રીંહ્રીંહ્રીં તથા હૂઁ હૂઁફટ્સ્વાહામન્ત્રરૂપિણી ।
ઇતિ શ્રીસર્વસામ્રાજ્યમેધાનામ સહસ્રકમ્ ॥ ૧૮૫ ॥

સુન્દરીશક્તિદાનાખ્યં સ્વરૂપાર્ભિધમેવ ચ ।
કથિતં દક્ષિણાકાલ્યાઃ સુન્દર્યૈ પ્રીતિયોગતઃ ॥ ૧ ॥

વરદાનપ્રસઙ્ગેન રહસ્યમપિ દર્શિતમ્ ।
ગોપનીયં સદા ભક્ત્યા પઠનીયં પરાત્પરમ્ ॥ ૨ ॥

પ્રાતર્મધ્યાહ્નકાલે ચ મધ્યાર્દ્ધરાત્રયોરપિ ।

યજ્ઞકાલે જપાન્તે ચ પઠનીયં વિશેષતઃ ॥ ૩॥

યઃ પઠેત્ સાધકો ધીરઃ કાલીરૂપો હિ વર્ષતઃ ।
પઠેદ્વા પાઠયેદ્વાપિ શૃણોતિ શ્રાવયેદપિ ॥ ૪॥

વાચકં તોષયેદ્વાપિ સ ભવેત્ કાલિકાતનુઃ ।
સહેલં વા સલીલં વા યશ્ચૈનં માનવઃ પઠેત્ ॥ ૫॥

સર્વદુઃખવિનિર્મુક્તસ્ત્રૈલોક્યવિજયી કવિઃ ।
મૃતવન્ધ્યા કાકવન્ધ્યા કન્યાવન્ધ્યા ચ વન્ધ્યકા ॥ ૬॥

પુષ્પવન્ધ્યા શૂલવન્ધ્યા શૃણુયાત્ સ્તોત્રમુત્તમમ્ ।
સર્વસિદ્ધિપ્રદાતારં સત્કવિં ચિરજીવિનમ્ ॥ ૭॥

પાણ્ડિત્યકીર્તિસંયુક્તં લભતે નાત્ર સંશયઃ ।
યં યં કામમુપસ્કૃત્ય કાલીં ધ્યાત્વા જપેત્સ્તવમ્ ॥ ૮॥

તં તં કામં કરે કૃત્વા મન્ત્રી ભવતિ નાઽન્યથા ।
યોનિપુષ્પૈર્લિઙ્ગપુષ્પૈઃ કુણ્ડગોલોદ્ભવૈરપિ ॥ ૯॥

સંયોગામૃતપુષ્પૈશ્ચ વસ્ત્રદેવીપ્રસૂનકૈઃ ।
કાલિપુષ્પૈઃ પીઠતોયૈર્યોનિક્ષાલનતોયકૈઃ ॥ ૧૦॥

કસ્તૂરીકુઙ્કુમૈર્દેવીં નખકાલાગરુક્રમાત્ ।
અષ્ટગન્ધૈર્ધૂપદીપર્યવયાવકસંયુતૈઃ ॥ ૧૧॥

રક્તચન્દનસિન્દૂરૈર્મત્સ્યમાંસાદિભૂષણૈઃ ।
મધુભિઃ પાયસૈઃ ક્ષીરૈઃ શોધિતૈઃ શોણિતૈરપિ ॥ ૧૨॥

મહોપચારૈ રક્તૈશ્ચ નૈવેદ્યૈઃ સુરસાન્વિતૈઃ ।
પૂજયિત્વા મહાકાલીં મહાકાલેન લાલિતામ્ ॥ ૧૩॥

વિદ્યારાજ્ઞીં કુલ્લુકાઞ્ચ જપ્ત્વા સ્તોત્રં જપેચ્છિવે ।
કાલીભક્તસ્ત્વેકચિત્તઃ સિન્દૂરતિલકાન્વિતઃ ॥ ૧૪॥

તામ્બૂલપૂરિતમુખો મુક્તકેશો દિગમ્બરઃ ।
શવયોનિસ્થિતો વીરઃ શ્મશાનસુરતાન્વિતઃ ॥ ૧૫॥

શૂન્યાલયે બિન્દુપીઠે પુષ્પાકીર્ણે શિવાનને ।
શયનોત્થપ્રભુઞ્જાનઃ કાલીદર્શનમાપ્નુયાત્ ॥ ૧૬॥

તત્ર યદ્યત્કૃતં કર્મ તદનન્તફલં ભવેત્ ।
ઐશ્વર્યે કમલા સાક્ષાત્ સિદ્ધૌ શ્રીકાલિકામ્બિકા ॥ ૧૭॥

કવિત્વે તારિણીતુલ્યઃ સૌન્દર્યે સુન્દરીસમઃ ।
સિન્ધોર્દ્ધારાસમઃ કાર્યે શ્રુતૌ શ્રુતિધરસ્તથા ॥ ૧૮॥

વજ્રાસ્ત્રમિવ દુર્ધર્ષસ્ત્રૈલોક્યવિજયાસ્ત્રભૃત્ ।
શત્રુહન્તા કાવ્યકર્તા ભવેચ્છિવસમઃ કલૌ ॥ ૧૯॥

દિગ્વિદિક્ચન્દ્રકર્તા ચ દિવારાત્રિવિપર્ય્યયી ।
મહાદેવસમો યોગી ત્રૈલોક્યસ્તમ્ભકઃ ક્ષણાત્ ॥ ૨૦॥

ગાનેન તુમ્બુરુઃ સાક્ષાદ્દાને કર્ણસમો ભવેત્ ।
ગજાઽશ્વરથપત્તીનામસ્ત્રાણામધિપઃ કૃતી ॥ ૨૧॥

આયુષ્યેષુ ભુશુણ્ડી ચ જરાપલિતનાશકઃ ।
વર્ષષોડશવાન્ ભૂયાત્ સર્વકાલે મહેશ્વરી ॥ ૨૨॥

બ્રહ્માણ્ડગોલે દેવેશિ ન તસ્ય દુર્લભં ક્વચિત્ ।
સર્વં હસ્તગતં ભૂયાન્નાત્ર કાર્ય્યા વિચારણા ॥ ૨૩॥

કુલપુષ્પયુતં દૃષ્ટ્વા તત્ર કાલીં વિચિન્ત્ય ચ ।
વિદ્યારાજ્ઞીં તુ સમ્પૂજ્ય પઠેન્નામસહસ્રકમ્ ॥ ૨૪॥

મનોરથમયી સિદ્ધિસ્તસ્ય હસ્તે સદા ભવેત્ ।
પરદારાન્ સમાલિઙ્ગય સમ્પૂજ્ય પરમેશ્વરીમ્ ॥ ૨૫॥

હસ્તાહસ્તિકયા યોગં કૃત્વા જપ્ત્વા સ્તવં પઠેત્ ।
યોનિં વીક્ષ્ય જપેત્ સ્તોત્રં કુબેરાદધિકો ભવેત્ ॥ ૨૬॥

કુણ્ડગોલોદ્ભવં ગૃહ્યવર્ણાક્તં હોમયેન્નિશિ ।
પિતૃભૂમૌ મહેશાનિ વિધિરેખાં પ્રમાર્જયેત્ ॥ ૨૭॥

તરુણીં સુન્દરીં રમ્યાં ચઞ્ચલાં કામગર્વિતામ્ ।
સમાનીય પ્રયત્નેન સંશોધ્ય ન્યાસયોગતઃ ॥ ૨૮॥

પ્રસૂનમઞ્ચે સંસ્થાપ્ય પૃથિવીં વશમાનયેત્ ।
મૂલચક્રં તુ સમ્ભાવ્ય દેવ્યાશ્ચરણસંયુતમ્ ॥ ૨૯॥

સમ્પૂજ્ય પરમેશાનીં સઙ્કલ્પ્ય તુ મહેશ્વરિ ।
જપ્ત્વા સ્તુત્વા મહેશાનીં પ્રણવં સંસ્મરેચ્છિવે ॥ ૩૦॥

અષ્ટોત્તરશતૈર્યોનિં પ્રમન્ત્ર્યાચુમ્બ્ય યત્નતઃ ।
સંયોગીભૂય જપ્તવ્યં સર્વવિદ્યાધિપો ભવેત્ ॥ ૩૧॥

શૂન્યાગારે શિવારણ્યે શિવદેવાલયે તથા ।
શૂન્યદેશે તડાગે ચ ગઙ્ગાગર્ભે ચતુષ્પથે ॥ ૩૨॥

શ્મશાને પર્વતપ્રાન્તે એકલિઙ્ગે શિવામુખે ।
મુણ્ડયોનૌ ઋતૌ સ્નાત્વા ગેહે વેશ્યાગૃહે તથા ॥ ૩૩॥

કુટ્ટિનીગૃહમધ્યે ચ કદલીમણ્ડપે તથા ।
પઠેત્સહસ્રનામાખ્યં સ્તોત્રં સર્વાર્થસિદ્ધયે ॥ ૩૪॥

અરણ્યે શૂન્યગર્તે ચ રણે શત્રુસમાગમે ।
પ્રજપેચ્ચ તતો નામ કાલ્યાશ્ચૈવ સહસ્રકમ્ ॥ ૩૫॥

બાલાનન્દપરો ભૂત્વા પઠિત્વા કાલિકાસ્તવમ્ ।
કાલીં સઞ્ચિન્ત્ય પ્રજપેત્ પઠેન્નામસહસ્રકમ્ ॥ ૩૬॥

સર્વસિદ્ધીશ્વરો ભૂયાદ્વાઞ્છાસિદ્ધીશ્વરો ભવેત્ ।
મુણ્ડચૂડકયોર્યોનિ ત્વચિ વા કોમલે શિવે ॥ ૩૭॥

વિષ્ટરે શવવસ્ત્રે વા પુષ્પવસ્ત્રાસનેઽપિ વા ।
મુક્તકેશો દિશાવાસો મૈથુની શયને સ્થિતઃ ॥ ૩૮॥

જપ્ત્વાકાલીં પઠેત્ સ્તોત્રં ખેચરીસિદ્ધિભાગ્ ભવેત્ ।
ચિકુરં યોગમાસાદ્ય શુક્રોત્સારણમેવ ચ ॥ ૩૯॥

જપ્ત્વા શ્રીદક્ષિણાં કાલીં શક્તિપાતશતં ભવેત્ ।
લતાં સ્પૃશન્ જપિત્વા ચ રમિત્વા ત્વર્ચયન્નપિ ॥ ૪૦॥

આહ્લાદયન્દિગાવાસઃ પરશક્તિં વિશેષતઃ ।
સ્તુત્વા શ્રીદક્ષિણાં કાલીં યોનિં સ્વકરગાઞ્ચરેત્ ॥ ૪૧॥

પઠેન્નામસહસ્રં યઃ સ શિવાદધિકો ભવેત્ ।
લતાન્તરેષુ જપ્તવ્યં સ્તુત્વા કાલીં નિરાકુલઃ ॥ ૪૨॥

દશાવધાનો ભવતિ માસમાત્રેણ સાધકઃ ।
કાલરાત્ર્યાં મહારાત્ર્યાં વીરરાત્ર્યામપિ પ્રિયે ॥ ૪૩॥

મહારાત્ર્યાં ચતુર્દશ્યામષ્ટમ્યાં સંક્રમેઽપિ વા ।

કુહૂપૂર્ણેન્દુશુક્રેષુ ભૌમામાયાં નિશામુખે ॥ ૪૪॥

નવમ્યાં મઙ્ગલદિને તથા કુલતિથૌ શિવે ।
કુલક્ષેત્રે પ્રયત્નેન પઠેન્નામસહસ્રકમ્ ॥ ૪૫॥

સુદર્શનો ભવેદાશુ કિન્નરીસિદ્ધિભાગ્ભવેત્ ।
પશ્ચિમાભિમુખં લિઙ્ગં વૃષશૂન્યં પુરાતનમ્ ॥ ૪૬॥

તત્ર સ્થિત્વા જપેત્ સ્તોત્રં સર્વકામાપ્તયે શિવે ।
ભૌમવારે નિશીથે વા અમાવસ્યાદિને શુભે ॥ ૪૭॥

માષભક્તબલિં છાગં કૃસરાન્નં ચ પાયસમ્ ।
દગ્ધમીનં શોણિતઞ્ચ દધિ દુગ્ધ ગુડાર્દ્રકમ્ ॥ ૪૮॥

બલિં દત્વા જપેત્ તત્ર ત્વષ્ટોત્તરસહસ્રકમ્ ।
દેવ-ગન્ધર્વ-સિદ્ધૌઘૈઃ સેવિતાં સુરસુન્દરીમ્ ॥ ૪૯॥

લભેદ્દેવેશિ માસેન તસ્ય ચાસન સંહતિઃ ।
હસ્તત્રયં ભવેદૂર્ધ્વં નાત્ર કાર્યા વિચારણા ॥ ૫૦॥

હેલયા લીલયા ભક્ત્યા કાલીં સ્તૌતિ નરસ્તુ યઃ ।
બ્રહ્માદીંસ્સતમ્ભયેદ્દેવિ માહેશીં મોહયેત્ક્ષણાત્ ॥ ૫૧॥

આકર્ષયેન્મહાવિદ્યાં દશપૂર્વાન્ ત્રિયામતઃ ।
કુર્વીત વિષ્ણુનિર્મ્માણં યમાદીનાં તુ મારણમ્ ॥ ૫૨॥

ધ્રુવમુચ્ચાટયેન્નૂનં સૃષ્ટિનૂતનતાં નરઃ ।
મેષમાહિષમાર્જારખરચ્છાગનરાદિકૈઃ ॥ ૫૩॥

ખડ્ગિશૂકરકાપોતૈષ્ટિટ્ટિભૈઃ શશકૈઃ પલૈઃ ।
શોણિતૈઃ સાસ્થિમાંસૈશ્ચ કારણ્ડૈર્દુગ્ધપાયસૈઃ ॥ ૫૪॥

કાદમ્બરીસિન્ધુમદ્યૈઃ સુરારિષ્ટૈશ્ચ સાસવૈઃ ।
યોનિક્ષાલિતતોયૈશ્ચ યોનિલિઙ્ગામૃતૈરપિ ॥ ૫૫॥

સ્વજાતકુસુમૈઃ પૂજ્યા જપાન્તે તર્પયેચ્છિવામ્ ।
સર્વસામ્રાજ્યનામ્ના તુ સ્તુત્વા નત્વા સ્વશક્તિતઃ ॥ ૫૬॥

શક્ત્યા લભન્ પઠેત્ સ્તોત્રં કાલીરૂપો દિનત્રયાત્ ।
દક્ષિણાકાલિકા તસ્ય ગેહે તિષ્ઠતિ નાન્યથા ॥ ૫૭॥

વેશ્યાલતાગૃહે ગત્વા તસ્યાશ્ચુમ્બનતત્પરઃ ।
તસ્યા યોનૌ મુખં દત્વા તદ્રસં વિલિહઞ્જપેત્ ॥ ૫૮॥

તદન્તે નામ સાહસ્રં પઠેદ્ભક્તિપરાયણઃ ।
કાલિકાદર્શનં તસ્ય ભવેદ્દેવિ ત્રિયામતઃ ॥ ૫૯॥

નૃત્યપાત્રગૃહે ગત્વા મકારપઞ્ચકાન્વિતઃ ।
પ્રસૂનમઞ્ચે સંસ્થાપ્ય શક્તિન્યાસપરાયણઃ ॥ ૬૦॥

પાત્રાણાં સાધનં કૃત્વા દિગ્વસ્ત્રાં તાં સમાચરેત્ ।
સમ્ભાવ્ય ચક્રં તન્મૂલે તત્ર સાવરણાં જપેત્ ॥ ૬૧॥

શતં ભાલે શતં કેશે શતં સિન્દૂરમણ્ડલે ।
શતત્રયં કુચદ્વન્દ્વે શતં નાભૌ મહેશ્વરિ ॥ ૬૨॥

શતં યોનૌ મહેશાનિ સંયોગે ચ શતત્રયમ્ ।
જપેત્તત્ર મહેશાનિ તદન્તે પ્રપઠેત્સ્તવમ્ ॥ ૬૩॥

શતાવધાનો ભવતિ માસમાત્રેણ સાધકઃ ।
માતઙ્ગિનીં સમાનીય કિં વા કાપાલિનીં શિવે ॥ ૬૪॥

દન્તમાલા જપે કાર્યા ગલે ધાર્યા નૃમુણ્ડજા ।
નેત્રપદ્મે યોનિચક્રં શક્તિચક્રં સ્વવક્ત્રકે ॥ ૬૫॥

કૃત્વા જપેન્મહેશાનિ મુણ્ડયન્ત્રં પ્રપૂજયેત્ ।
મુણ્ડાસનસ્થિતો વીરો મકારપઞ્ચકાન્વિતઃ ॥ ૬૬॥

અન્યામાલિઙ્ગય પ્રજપેદન્યાં સઞ્ચુમ્બ્ય વૈ પઠેત્ ।
અન્યાં સમ્પૂજયેત્તત્ર ત્વન્યાં સમ્મર્દયન્ જપેત્ ॥ ૬૭॥

અન્યયોનૌ શિવં દત્વા પુનઃ પૂર્વવદાચરેત્ ।
અવધાનસહસ્રેષુ શક્તિપાતશતેષુ ચ ॥ ૬૮॥

રાજા ભવતિ દેવેશિ માસપઞ્ચકયોગતઃ ।
યવનીશક્તિમાનીય ગાનશક્તિપરાયણમ્ ॥ ૬૯॥

કુલાચારમતેનૈવ તસ્યા યોનિં વિકાસયેત્ ।
તત્ર પ્રદાય જિહ્વાં તુ જપેન્નામસહસ્રકમ્ ॥ ૭૦॥

નૃકપાલે તત્ર દીપં જપેત્પ્રજ્વાલ્ય યત્નતઃ ।
મહાકવિવરો ભૂયાન્નાત્ર કાર્યા વિચારણા ॥ ૭૧॥

કામાર્તાં શક્તિમાનીય યોનૌ તુ મૂલચક્રકમ્ ।
વિલિખ્ય પરમેશાનિ તત્ર મન્ત્રં લિખેચ્છિવે ॥ ૭૨॥

તલ્લિહન્ પ્રજપેદ્દેવિ સર્વશાસ્ત્રાર્થતત્વવિત્ ।
અશ્રુતાનિ ચ શાસ્ત્રાણિ વેદાદીન્ પાઠયેદ્ ધ્રુવમ્ ॥ ૭૩॥

વિના ન્યાસૈર્વિના પાઠૈર્વિનાધ્યાનાદિભિઃ પ્રિયે ।
ચતુર્વેદાધિપો ભૂત્વા ત્રિકાલજ્ઞસ્ત્રિવર્ષતઃ ॥ ૭૪॥

ચતુર્વિધં ચ પાણ્ડિત્યં તસ્ય હસ્તગતં ક્ષણાત્ ।
શિવાબલિઃ પ્રદાતવ્યઃ સર્વદા શૂન્યમણ્ડલે ॥ ૭૫॥

કાલીધ્યાનં મન્ત્રર્ચિતા નીલસાધનમેવ ચ ।
સહસ્રનામપાઠશ્ચ કાલીનામપ્રકીર્તનમ્ ॥ ૭૬॥

ભક્તસ્ય કાર્યમેતાવદન્યદભ્યુદયં વિદુઃ ।
વીરસાધનકં કર્મ શિવાપૂજા બલિસ્તથા ॥ ૭૭॥

સિન્દૂરતિલકો દેવિ વેશ્યાલાપો નિરન્તરમ્ ।
વેશ્યાગૃહે નિશાચારો રાત્રૌ પર્યટનં તથા ॥ ૭૮॥

શક્તિપૂજા યોનિદૃષ્ટિઃ ખડ્ગહસ્તો દિગમ્બરઃ ।
મુક્તકેશો વીરવેષઃ કુલમૂર્તિધરો નરઃ ॥ ૭૯॥

કાલીભક્તો ભવેદ્દેવિ નાન્યથા ક્ષેમમાપ્નુયાત્ ।
દુગ્ધાસ્વાદી યોનિલેહી સંવિદાસવઘૂર્ણિતઃ ॥ ૮૦॥

વેશ્યાલતાસમાયોગાન્માસાત્કલ્પલતા સ્વયમ્ ।
વેશ્યાચક્રસમાયોગાત્કાલીચક્રસમઃ સ્વયમ્ ॥ ૮૧॥

વેશ્યાદેહસમાયોગાત્ કાલીદેહસમઃ સ્વયમ્ ।
વેશ્યામધ્યગતં વીરં કદા પશ્યામિ સાધકમ્ ॥ ૮૨॥

એવં વદતિ સા કાલી તસ્માદ્વેશ્યા વરા મતા ।
વેશ્યા કન્યા તથા પીઠજાતિભેદકુલક્રમાત્ ॥ ૮૩॥

અકુલક્રમભેદેન જ્ઞાત્વા ચાપિ કુમારિકામ્ ।
કુમારીં પૂજયેદ્ભક્ત્યા જપાન્તે ભવને પ્રિયે ॥ ૮૪॥

પઠેન્નામસહસ્રં યઃ કાલીદર્શનભાગ્ ભવેત્ ।

ભક્ત્યા કુમારીં સમ્પૂજ્ય વૈશ્યાકુલ સમુદ્ભવામ્ ॥ ૮૫॥

વસ્ત્ર હેમાદિભિસ્તોષ્યા યત્નાત્સ્તોત્રં પઠેચ્છિવે ।
ત્રૈલોક્ય વિજયી ભૂયાદ્દિવા ચન્દ્રપ્રકાશકઃ ॥ ૮૬॥

યદ્યદ્દત્તં કુમાર્યૈ તુ તદનન્તફલં ભવેત્ ।
કુમારીપૂજનફલં મયા વક્તું ન શક્યતે ॥ ૮૭॥

ચાઞ્ચલ્યાદ્દુરિતં કિઞ્ચિત્ક્ષમ્યતામયમઞ્જલિઃ ।
એકા ચેત્પૂજિતા બાલા દ્વિતીયા પૂજિતા ભવેત્ ॥ ૮૮॥

કુમાર્યઃ શક્તયશ્ચૈવ સર્વમેતચ્ચરાચરમ્ ।
શક્તિમાનીય તદ્ગાત્રે ન્યાસજાલં પ્રવિન્યસેત્ ॥ ૮૯॥

વામભાગે ચ સંસ્થાપ્ય જપેન્નામસહસ્રકમ્ ।
સર્વસિદ્ધીશ્વરો ભૂયાન્નાત્ર કાર્યા વિચારણા ॥ ૯૦॥

શ્મશાનસ્થો ભવેત્સ્વસ્થો ગલિતં ચિકુરં ચરેત્ ।
દિગમ્બરઃ સહસ્રં ચ સૂર્યપુષ્પં સમાનયેત્ ॥ ૯૧॥

સ્વવીર્યેણ પ્લુતં કૃત્વા પ્રત્યેકં પ્રજપન્ હુનેત્ ।
પૂજ્ય ધ્યાત્વા મહાભક્ત્યા ક્ષમાપાલો નરઃ પઠેત્ ॥ ૯૨॥

નખં કેશં સ્વવીર્યં ચ યદ્યત્સમ્માર્જનીગતમ્ ।
મુક્તકેશો દિશાવાસો મૂલમન્ત્રપુરઃસરઃ ॥ ૯૩॥

કુજવારે મધ્યરાત્રે હોમં કૃત્વા શ્મશાનકે ।
પઠેન્નામસહસ્રં યઃ પૃથ્વીશાકર્ષકો ભવેત્ ॥ ૯૪॥

પુષ્પયુક્તે ભગે દેવિ સંયોગાનન્દતત્પરઃ ।
પુનશ્ચિકુરમાસાદ્ય મૂલમન્ત્રં જપન્ શિવે ॥ ૯૫॥

ચિતાવહ્નૌ મધ્યરાત્રે વીર્યમુત્સાર્ય યત્નતઃ ।
કાલિકાં પૂજયેત્તત્ર પઠેન્નામ સહસ્રકમ્ ॥ ૯૬॥

પૃથ્વીશાકર્ષણં કુર્યાન્નાત્ર કાર્યા વિચારણા ।
કદલી વનમાસાદ્ય લક્ષમન્ત્રં જપેન્નરઃ ॥ ૯૭॥

મધુમત્યા સ્વયં દેવ્યા સેવ્યમાનઃ સ્મરોપમઃ ।
શ્રીમધુમતીત્યુક્ત્વા તથા સ્થાવરજઙ્ગમાન્ ॥ ૯૮॥

આકર્ષિણીં સમુચ્ચાર્ય ઠંઠ સ્વાહા સમુચ્ચરેત્ ।
ત્રૈલોક્યાકર્ષિણી વિદ્યા તસ્ય હસ્તે સદા ભવેત્ ॥ ૯૯ ॥

નદીં પુરીં ચ રત્નાનિ હેમસ્ત્રીશૈલભૂરુહાન્ ।
આકર્ષયત્યમ્બુનિધિં સુમેરું ચ દિગન્તતઃ ॥ ૧૦૦ ॥

અલભ્યાનિ ચ વસ્તૂનિ દૂરાદ્ભૂમિતલાદપિ ।
વૃત્તાન્તં ચ સુરસ્થાનાદ્રહસ્યે વિદુષામપિ ॥ ૧૦૧ ॥

રાજ્ઞાં ચ કથયત્યેષા સત્યં સત્વરમાદિશેત્ ।
દ્વિતીયવર્ષપાઠેન ભવેત્પદ્માવતી શુભા ॥ ૧૦૨ ॥

ૐ હ્રીંપદ્માવતિ પદં તતસ્ત્રૈલોક્યનામ ચ ।
વાર્તાં ચ કથય દ્વન્દ્વં સ્વાહાન્તો મન્ત્ર ઈરિતઃ ॥ ૧૦૩ ॥

બ્રહ્મવિષ્ણ્વાદિકાનાં ચ ત્રૈલોક્યે યાદૃશી ભવેત્ ।
સર્વં વદતિ દેવેશી ત્રિકાલજ્ઞઃ કવિશ્શુભઃ ॥ ૧૦૪ ॥

ત્રિવર્ષં સમ્પઠન્દેવિ લભેદ્ભોગવતીં કલામ્ ।
મહાકાલેન દૃષ્ટોઽપિ ચિતામધ્યગતોઽપિ વા ॥ ૧૦૫ ॥

તસ્યા દર્શનમાત્રેણ ચિરઞ્જીવી નરો ભવેત્ ।
મૃતસઞ્જીવિનીત્યુક્ત્વા મૃતમુત્થાપય દ્વયમ્ ॥ ૧૦૬ ॥

સ્વાહાન્તો મનુરાખ્યાતો મૃતસઞ્જીવનાત્મકઃ ।
ચતુર્વર્ષં પઠેદ્યસ્તુ સ્વપ્નસિદ્ધિસ્તતો ભવેત્ ॥ ૧૦૭ ॥

ૐ હ્રીં સ્વપ્નવારાહિ કાલિસ્વપ્ને કથયોચ્ચરેત્ ।
અમુકસ્યાઽમુકં દેહિ ક્લીં સ્વાહાન્તો મનુર્મતઃ ॥ ૧૦૮ ॥

સ્વપ્નસિદ્ધા ચતુર્વર્ષાત્તસ્ય સ્વપ્ને સદા સ્થિતા ।
ચતુર્વર્ષસ્ય પાઠેન ચતુર્વેદાધિપો ભવેત્ ॥ ૧૦૯ ॥

તદ્ધસ્તજલસંયોગાન્મૂર્ખઃ કાવ્યં કરોતિ ચ ।
તસ્ય વાક્યપરિચયાન્મૂર્તિર્વિન્દતિ કાવ્યતામ્ ॥ ૧૧૦ ॥

મસ્તકે તુ કરં કૃત્વા વદ વાણીમિતિ બ્રુવન્ ।
સાધકો વાઞ્છયા કુર્યાત્તત્તથૈવ ભવિષ્યતિ ॥ ૧૧૧ ॥

બ્રહ્માણ્ડગોલકે યાશ્ચ યાઃ કાશ્ચિજ્જગતીતલે ।
સમસ્તાઃ સિદ્ધયો દેવિ કરામલકવત્સદા ॥ ૧૧૨ ॥

સાધકસ્મૃતિમાત્રેણ યાવન્ત્યઃ સન્તિ સિદ્ધયઃ ।
સ્વયમાયાન્તિ પુરતો જપાદીનાં તુ કા કથા ॥ ૧૧૩॥

વિદેશવર્તિનો ભૂત્વા વર્તન્તે ચેટકા ઇવ ।
અમાયાં ચન્દ્રસન્દર્શશ્ચન્દ્રગ્રહણમેવ ચ ॥ ૧૧૪॥

અષ્ટમ્યાં પૂર્ણચન્દ્રત્વં ચન્દ્રસૂર્યાષ્ટકં તથા ।
અષ્ટદિક્ષુ તથાષ્ટૌ ચ કરોત્યેવ મહેશ્વરિ ॥ ૧૧૫॥

અણિમા ખેચરત્વં ચ ચરાચરપુરીગતમ્ ।
પાદુકાખડ્ગવેતાલયક્ષિણીગુહ્યકાદયઃ ॥ ૧૧૬॥

તિલકોગુપ્તતાદૃશ્યં ચરાચરકથાનકમ્ ।
મૃતસઞ્જીવિનીસિદ્ધિર્ગુટિકા ચ રસાયનમ્ ॥ ૧૧૭॥

ઉડ્ડીનસિદ્ધિર્દેવેશિ ષષ્ટિસિદ્ધીશ્વરત્વકમ્ ।
તસ્ય હસ્તે વસેદ્દેવિ નાત્ર કાર્યા વિચારણા ॥ ૧૧૮॥

કેતૌ વા દુન્દુભૌ વસ્ત્રે વિતાને વેષ્ટનેગૃહે ।
ભિત્તૌ ચ ફલકે દેવિ લેખ્યં પૂજ્યં ચ યત્નતઃ ॥ ૧૧૯॥

મધ્યે ચક્રં દશાઙ્ગોક્તં પરિતો નામલેખનમ્ ।
તદ્ધારણાન્મહેશાનિ ત્રૈલોક્યવિજયી ભવેત્ ॥ ૧૨૦॥

એકો હિ શતસાહસ્રં નિર્જિત્ય ચ રણાઙ્ગણે ।
પુનરાયાતિ ચ સુખં સ્વગૃહં પ્રતિ પાર્વતી ॥ ૧૨૧॥

એકો હિ શતસન્દર્શી લોકાનાં ભવતિ ધ્રુવમ્ ।
કલશં સ્થાપ્ય યત્નેન નામસાહસ્રકં પઠેત્ ॥ ૧૨૨॥

સેકઃ કાર્યો મહેશાનિ સર્વાપત્તિનિવારણે ।
ભૂતપ્રેતગ્રહાદીનાં રાક્ષસાં બ્રહ્મરાક્ષસામ્ ॥ ૧૨૩॥

વેતાલાનાં ભૈરવાણાં સ્કન્દવૈનાયકાદિકાન્ ।
નાશયેત્ ક્ષણમાત્રેણ નાત્ર કાર્યા વિચારણા ॥ ૧૨૪॥

ભસ્મભિર્મન્ત્રિતં કૃત્વા ગ્રહગ્રસ્તં વિલેપયેત્ ।
ભસ્મસંક્ષેપણાદેવ સર્વગ્રહવિનાશનમ્ ॥ ૧૨૫॥

નવનીતં ચાભિમન્ત્ર્ય સ્ત્રીભ્યો દદ્યાન્મહેશ્વરિ ।

વન્ધ્યા પુત્રપ્રદાં દેવિ નાત્ર કાર્યા વિચારણા ॥ ૧૨૬॥

કણ્ઠે વા વામબાહૌ વા યોનૌ વા ધારણાચ્છિવે ।
બહુપુત્રવતી નારી સુભગા જાયતે ધ્રુવમ્ ॥ ૧૨૭॥

પુરુષો દક્ષિણાઙ્ગે તુ ધારયેત્સર્વસિદ્ધયે ।
બલવાન્કીર્તિમાન ધન્યોધાર્મિકઃ સાધકઃ કૃતી ॥ ૧૨૮॥

બહુપુત્રી રથાનાં ચ ગજાનામધિપઃ સુધીઃ ।
કામિનીકર્ષણોદ્યુક્તઃ ક્રીં ચ દક્ષિણકાલિકે ॥ ૧૨૯॥

ક્રીં સ્વાહા પ્રજપેન્મન્ત્રમયુતં નામપાઠકઃ ।
આકર્ષણં ચરેદ્દેવિ જલખેચરભૂગતાન્ ॥ ૧૩૦॥

વશીકરણકામો હિ હૂઁ હૂઁ હ્રીં હ્રીં ચ દક્ષિણે ।
કાલિકે પૂર્વબીજાનિ પૂર્વવત્પ્રજપન્ પઠેત્ ॥ ૧૩૧॥

ઉર્વશીમપિ વસયેન્નાત્ર કાર્યા વિચારણા ।
ક્રીં ચ દક્ષિણકાલિકે સ્વાહા યુક્તં જપેન્નરઃ ॥ ૧૩૨॥

પઠેન્નામસહસ્રં તુ ત્રૈલોક્યં મારયેદ્ધ્રુવમ્ ।
સદ્ભક્તાય પ્રદાતવ્યા વિદ્યા રાજ્ઞિ શુભે દિને ॥ ૧૩૩॥

સદ્વિનીતાય શાન્તાય દાન્તાયાતિગુણાય ચ ।
ભક્તાય જ્યેષ્ઠપુત્રાય ગુરુભક્તિપરાય ચ ॥ ૧૩૪॥

વૈષ્ણવાય પ્રશુદ્ધાય શિવાબલિરતાય ચ ।
વેશ્યાપૂજનયુક્તાય કુમારીપૂજકાય ચ ॥ ૧૩૫॥

દુર્ગાભક્તાય રૌદ્રાય મહાકાલપ્રજાપિને ।
અદ્વૈતભાવયુક્તાય કાલીભક્તિપરાય ચ ॥ ૧૩૬॥

દેયં સહસ્રનામાખ્યં સ્વયં કાલ્યા પ્રકાશિતમ્ ।
ગુરુદૈવતમન્ત્રાણાં મહેશસ્યાપિ પાર્વતિ ॥ ૧૩૭॥

અભેદેન સ્મરેન્મન્ત્રં સ શિવઃ સ ગણાધિપઃ ।
યો મન્ત્રં ભાવયેન્મન્ત્રી સ શિવો નાત્ર સંશયઃ ॥ ૧૩૮॥

સ શાક્તો વૈષ્ણવસ્સૌરઃ સ એવં પૂર્ણદીક્ષિતઃ ।
અયોગ્યાય ન દાતવ્યં સિદ્ધિરોધઃ પ્રજાયતે ॥ ૧૩૯॥

વેશ્યાસ્ત્રીનિન્દકાયાથ સુરાસંવિત્પ્રનિન્દકે ।
સુરામુખો મનું સ્મૃત્વા સુરાચાર્યો ભવિષ્યતિ ॥ ૧૪૦॥

વાગ્દેવતા ઘોરે આસાપરઘારે ચ હૂઁ વદેત્ ।
ઘોરરૂપે મહાઘોરે મુખીભીમપદં વદેત્ ॥ ૧૪૧॥

ભીષણ્યમુષ્યષષ્ઠ્યન્તં હેતુર્વામયુગે શિવે ।
શિવવહ્નિયુગાસ્ત્રં હૂઁ હૂઁ કવચમનુર્ભવેત્ ॥ ૧૪૨॥

એતસ્ય સ્મરણાદેવ દુષ્ટાનાં ચ મુખે સુરા ।
અવતીર્ણા ભવદ્દેવિ દુષ્ટાનાં ભદ્રનાશિની ॥ ૧૪૩॥

ખલાય પરતન્ત્રાય પરનિન્દાપરાય ચ ।
ભ્રષ્ટાય દુષ્ટસત્વાય પરવાદરતાય ચ ॥ ૧૪૪॥

શિવાભક્તાય દુષ્ટાય પરદારરતાય ચ ।
ન સ્તોત્રં દર્શયેદ્દેવિ શિવહત્યાકરો ભવેત્ ॥ ૧૪૫॥

કાલિકાનન્દહૃદયઃ કાલિકાભક્તિમાનસઃ ।
કાલીભક્તો ભવેત્સોઽયં ધન્યરૂપઃ સ એવ તુ ॥ ૧૪૬॥

કલૌ કાલી કલૌ કાલી કલૌ કાલી વરપ્રદા ।
કલૌ કાલી કલૌ કાલી કલૌ કાલી તુ કેવલા ॥ ૧૪૭॥

બિલ્વપત્રસહસ્રાણિ કરવીરાણિ વૈ તથા ।
પ્રતિનામ્ના પૂજયેદ્ધિ તેન કાલી વરપ્રદા ॥ ૧૪૮॥

કમલાનાં સહસ્રં તુ પ્રતિનામ્ના સમર્પયેત્ ।
ચક્રં સમ્પૂજ્ય દેવેશિ કાલિકાવરમાપ્નુયાત્ ॥ ૧૪૯॥

મન્ત્રક્ષોભયુતો નૈવ કલશસ્થજલેન ચ ।
નામ્ના પ્રસેચયેદ્દેવિ સર્વક્ષોભવિનાશકૃત્ ॥ ૧૫૦॥

તથા દમનકં દેવિ સહસ્રમાહરેદ્વ્રતી ।
સહસ્રનામ્ના સમ્પૂજ્ય કાલીવરમવાપ્નુયાત્ ॥ ૧૫૧॥

ચક્રં વિલિખ્ય દેહસ્થં ધારયેત્કાલિકાતનુઃ ।
કાલ્યૈ નિવેદિતં યદ્યત્તદંશં ભક્ષયેચ્છિવે ॥ ૧૫૨॥

દિવ્યદેહધરો ભૂત્વા કાલીદેહે સ્થિતો ભવેત્ ।
નૈવેદ્યનિન્દકાન્ દુષ્ટાન્ દૃષ્ટ્વા નૃત્યન્તિ ભૈરવા ॥ ૧૫૩॥

યોગિન્યશ્ચ મહાવીરા રક્તપાનોદ્યતાઃ પ્રિયે ।
માંસાસ્થિચર્મણોદ્યુક્તા ભક્ષયન્તિ ન સંશયઃ ॥ ૧૫૪॥

તસ્માન્ન નિન્દયેદ્દેવિ મનસા કર્મણા ગિરા ।
અન્યથા કુરુતે યસ્તુ તસ્ય નાશો ભવિષ્યતિ ॥ ૧૫૫॥

ક્રમદીક્ષાયુતાનાં ચ સિદ્ધિર્ભવતિ નાન્યથા ।
મન્ત્રક્ષોભશ્ચ વા ભૂયાત્ ક્ષીણાયુર્વા ભવેદ્ધ્રુવમ્ ॥ ૧૫૬॥

પુત્રહારી સ્ત્રિયોહારી રાજ્યહારી ભવેદ્ધ્રુવમ્ ।
ક્રમદીક્ષાયુતો દેવિ ક્રમાદ્રાજ્યમવાપ્નુયાત્ ॥ ૧૫૭॥

એકવારં પઠેદ્દેવિ સર્વપાપવિનાશનમ્ ।
દ્વિવારં ચ પઠેદ્યો હિ વાઞ્છાં વિન્દતિ નિત્યશઃ ॥ ૧૫૮॥

ત્રિવારં ચ પઠેદ્યસ્તુ વાગીશસમતાં વ્રજેત્ ।
ચતુર્વારં પઠેદ્દેવિ ચતુર્વર્ણાધિપો ભવેત્ ॥ ૧૫૯॥

પઞ્ચવારં પઠેદ્દેવિ પઞ્ચકામાધિપો ભવેત્ ।
ષડ્વારં ચ પઠેદ્દેવિ ષડૈશ્વર્યાધિપો ભવેત્ ॥ ૧૬૦॥

સપ્તવારં પઠેત્સપ્તકામનાં ચિન્તિતં લભેત્ ।
વસુવારં પઠેદ્દેવિ દિગીશો ભવતિ ધ્રુવમ્ ॥ ૧૬૧॥

નવવારં પઠેદ્દેવિ નવનાથસમો ભવેત્ ।
દશવારં કીર્ત્તયેદ્યો દશાર્હઃ ખેચરેશ્વરઃ ॥ ૧૬૨॥

વિંશતિવારં કીર્તયેદ્યઃ સર્વૈશ્વર્યમયો ભવેત્ ।
પઞ્ચવિંશતિવારૈસ્તુ સર્વચિન્તાવિનાશકઃ ॥ ૧૬૩॥

પઞ્ચાશદ્વારમાવર્ત્ય પઞ્ચભૂતેશ્વરો ભવેત્ ।
શતવારં કીર્ત્તયેદ્યઃ શતાનનસમાનધીઃ ॥ ૧૬૪॥

શતપઞ્ચકમાવર્ત્ય રાજરાજેશ્વરો ભવેત્ ।
સહસ્રાવર્તનાદ્દેવિ લક્ષ્મીરાવૃણુતે સ્વયમ્ ॥ ૧૬૫॥

ત્રિસહસ્રં સમાવર્ત્ય ત્રિનેત્રસદૃશો ભવેત્ ।
પઞ્ચ સાહસ્રમાવર્ત્ય કામકોટિ વિમોહનઃ ॥ ૧૬૬॥

દશસાહસ્રમાવર્ત્ય ભવેદ્દશમુખેશ્વરઃ ।

પઞ્ચવિંશતિસાહસ્રૈ ચ ચતુર્વિંશતિસિદ્ધિધૃક્ ॥ ૧૬૭॥

લક્ષાવર્તનમાત્રેણ લક્ષ્મીપતિસમો ભવેત્ ।
લક્ષત્રયાવર્ત્તનાત્તુ મહાદેવં વિજેષ્યતિ ॥ ૧૬૮॥

લક્ષપઞ્ચકમાવર્ત્ય કલાપઞ્ચકસંયુતઃ ।
દશલક્ષાવર્ત્તનાત્તુ દશવિદ્યાપ્તિરુત્તમા ॥ ૧૬૯॥

પઞ્ચવિંશતિલક્ષૈસ્તુ દશવિદ્યેશ્વરો ભવેત્ ।
પઞ્ચાશલ્લક્ષમાવૃત્ય મહાકાલસમો ભવેત્ ॥ ૧૭૦॥

કોટિમાવર્ત્તયેદ્યસ્તુ કાલીં પશ્યતિ ચક્ષુષા ।
વરદાનોદ્યુક્તકરાં મહાકાલસમન્વિતામ્ ॥ ૧૭૧॥

પ્રત્યક્ષં પશ્યતિ શિવે તસ્યા દેહો ભવેદ્ધ્રુવમ્ ।
શ્રીવિદ્યાકાલિકાતારાત્રિશક્તિવિજયી ભવેત્ ॥ ૧૭૨॥

વિધેર્લિપિં ચ સમ્માર્જ્ય કિઙ્કરત્વં વિસૃજ્ય ચ ।
મહારાજ્યમવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૧૭૩॥

ત્રિશક્તિવિષયે દેવિક્રમદીક્ષા પ્રકીર્તિતા ।
ક્રમદીક્ષાયુતો દેવિ રાજા ભવતિ નિશ્ચિતમ્ ॥ ૧૭૪॥

ક્રમદીક્ષાવિહીનસ્ય ફલં પૂર્વમિહેરિતમ્ ।
ક્રમદીક્ષાયુતો દેવિ શિવ એવ ન ચાપરઃ ॥ ૧૭૫॥

ક્રમદીક્ષાસમાયુક્તઃ કાલ્યુક્તસિદ્ધિભાગ્ભવેત્ ।
ક્રમદીક્ષાવિહીનસ્ય સિદ્ધિહાનિઃ પદે પદે ॥ ૧૭૬॥

અહો જન્મવતાં મધ્યે ધન્યઃ ક્રમયુતઃ કલૌ ।
તત્રાપિ ધન્યો દેવેશિ નામસાહસ્રપાઠકઃ ॥ ૧૭૭॥

દશકાલીવિધૌ દેવિ સ્તોત્રમેતત્સદા પઠેત્ ।
સિદ્ધિં વિન્દતિ દેવેશિ નાત્ર કાર્યા વિચારણા ॥ ૧૭૮॥

કાકી કાલી મહાવિદ્યા કલૌ કાલી ચ સિદ્ધિદા ।
કલૌ કાલી ચ સિદ્ધા ચ કલૌ કાલી વરપ્રદા ॥ ૧૭૯॥

કલૌ કાલી સાધકસ્ય દર્શનાર્થં સમુદ્યતા ।
કલૌ કાલી કેવલા સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૧૮૦॥

નાન્યવિદ્યા નાન્યવિદ્યા નાન્યવિદ્યા કલૌ ભવેત્ ।
કલૌ કાલીં વિહાયાથ યઃ કશ્ચિત્સિદ્ધિકામુકઃ ॥ ૧૮૧॥

સ તુ શક્તિં વિના દેવિ રતિસમ્ભોગમિચ્છતિ ।
કલૌ કાલીં વિના દેવિ યઃ કશ્ચિત્સિદ્ધિમિચ્છતિ ॥ ૧૮૨॥

સ નીલસાધનં ત્યક્ત્વા પરિભ્રમતિ સર્વતઃ ।
કલૌ કાલી વિહાયાથ યઃ કશ્ચિન્મોક્ષમિચ્છતિ ॥ ૧૮૩॥

ગુરુધ્યાનં પરિત્યજ્ય સિદ્ધિમિચ્છતિ સાધકઃ ।
કલૌ કાલી વિહાયાથ યઃ કશ્ચિદ્રાજ્યમિચ્છતિ ॥ ૧૮૪॥

સ ભોજન પરિત્યજ્ય ભિક્ષુવૃત્તિમભીપ્સતિ ।
સ ધન્યઃ સ ચ વિજ્ઞાની સ એવ સુરપૂજિતઃ ॥ ૧૮૫॥

સ દીક્ષિતઃ સુખી સાધુઃ સત્યવાદી જિતેન્દ્રિયઃ ।
સ વેદવક્તા સ્વાધ્યાયી નાત્ર કાર્યા વિચારણા ॥ ૧૮૬॥

શિવરૂપં ગુરું ધ્યાત્વા શિવરૂપં ગુરું સ્મરેત્ ।
સદાશિવઃ સ એવ સ્યાનાત્ર કાર્યા વિચારણા ॥ ૧૮૭॥

સ્વસ્મિન્ કાલીં તુ સમ્ભાવ્ય પૂજયેજ્જગદમ્બિકામ્ ।
ત્રૈલોક્યવિજયી ભૂયાન્નાત્ર કાર્ય્યા વિચારણા ॥ ૧૮૮॥

ગોપનીયં ગોપનીયં ગોપનીયં પ્રયત્નતઃ ।
રહસ્યાતિરહસ્યં ચ રહસ્યાતિરહસ્યકમ્ ॥ ૧૮૯॥

શ્લોકાર્દ્ધં પાદમાત્રં વા પાદાદર્ધં ચ તદર્ધકમ્ ।
નામાર્ધં યઃ પઠેદ્દેવિ ન વન્ધ્યદિવસં ન્યસેત્ ॥ ૧૯૦॥

પુસ્તકં પૂજયેદ્ભક્ત્યા ત્વરિતં ફલસિદ્ધયે ।
ન ચ મારીભયં તત્ર ન ચાગ્નિર્વાયુસમ્ભવમ્ ॥ ૧૯૧॥

ન ભૂતાદિભયં તત્ર સર્વત્ર સુખમેધતે ।
કુઙ્કુમાऽલક્તકેનૈવ રોચનાऽગરુયોગતઃ ॥ ૧૯૨॥

ભૂર્જપત્રે લિખેત્ પુસ્તં સર્વકામાર્થસિદ્ધયે ।
ઇતિ સંક્ષેપતઃ પ્રોક્તં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૧૯૩॥

ઇતિ ગદિતમશેષં કાલિકાવર્ણરૂપમ્ ।
પ્રપઠતિ યદિ ભક્ત્યા સર્વસિદ્ધીશ્વરઃ સ્યાત્ ॥ ૧૯૪॥

અભિનવસુખકામઃ સર્વવિદ્યાભિરામો
ભવતિ સકલસિદ્ધિઃ સર્વવીરાસમૃદ્ધિઃ ॥ ૧૯૫॥

॥ ઇતિ શ્રીમદાદિનાથમહાકાલવિરચિતાયાં મહાકાલસંહિતાયાં
કાલકાલીસંવાદે સુન્દરીશક્તિદાનાખ્યં કાલીસ્વરૂપ
મેધાસામ્રાજ્યપ્રદં સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

The stotra was attributed to kAlI tantra and rudrayAmala but I have the hard copy and I have seen the manuscripts in Bombay University as well as Asiatic Society. This is definitely a part of the lost 'kAlakAlI khaNDa of mahAkAlasaitA'. Only the begining suggests that it is from rudrayAmala ie kailAsashikhare ... but the rest of the matter suggests otherwise. So since the kAlakAlIkhaNDa is not available someone must have attributed this to kAlItantra and rudrayAmala. I have taken the liberty to end the stotra with the ending in my hard copy - mahAkAla sa.nhitA - guhyakAlI khaNDa - 3 of ga NgAnath jhA sa.nskRit vidyApiTH, alAhAbAd.

A note by Ravin.

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*kakArAdi kAlI sahasranAma stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*